
अथ भीष्मस्तवराज प्रारंभः



श्रीगणेशायनमः॥ ॥यस्यस्मरणमात्रेणजन्मसंसारबंधना-
त् ॥ विमुच्यतेनमस्तस्मैविष्णवेप्रभविष्णवे ॥१॥ वैशंपायनउवा
च॥ ॥श्रुत्वाधर्मानशेषेणपावनानिचसर्वशः॥युधिष्ठिरः शांत
नवंपुनरेवाभ्यभाषत॥२॥ ॥युधिष्ठिरउ०॥ ॥किमेकंदैवतंलो
केकिंवाप्येकंपरायणं॥स्तुवंतःकंकमर्चंतःप्राप्नुयुर्मानवाःशुभ
म्॥३॥कोधर्मःसर्वधर्माणांभवतःपरमोमतः॥ किंजपन्मुच्य
तेजंतुर्जन्मसंसारबंधनात्॥४॥भीष्मउवाच॥ जगत्प्रभुंदेव
देवमनंतंपुरुषोत्तमम् ॥स्तुवन्नामसहस्रेणपुरुषःसततोत्थि
तः॥५॥तमेवचार्चयन्नित्यंभक्त्यापुरुषमव्ययम्॥ध्याय
न्स्तुवन्नमस्यंश्चयजमानस्तमेवच॥६॥अनादिनिधनंवि-
ष्णुंसर्वलोकमहेश्वरम्॥ लोकाध्यक्षंस्तुवन्नित्यंसर्वदुःखा-

तिगोभवेत् ॥ ७॥ ब्रह्मण्यंसर्वधर्मज्ञंलोकानांकीर्तिवर्धनम् ॥ लोकनाथंमहद्भूतंसर्वभूतभवोद्भवं ॥ ८॥ एषमेसर्वधर्माणांधर्मोऽधिकतमोमतः ॥ यद्भक्त्यापुंडरीकाक्षंस्तवैरर्चेन्नरः सदा ॥ ९॥ परमंयोमहत्तेजाःपरमंयोमहत्तपाः ॥ परमंयोमहद्ब्रह्म परमंयः परायणं ॥१०॥ पवित्राणांपवित्रंयोमंगलानांचमंगलं ॥ दैवतंदेवतानांच भूतानांयोऽव्ययः पिता ॥११॥ यतः सर्वाणिभूतानिभवंत्यादियुगागमे ॥ यस्मिंश्चप्रलयंयांति पुनरेव युगक्षये ॥१२॥ तस्यलोकप्रधानस्यजगन्नाथस्यभूपते ॥ विष्णोर्नामसहस्रंमेशृणुपापभयापहम् ॥ १३ ॥ यानिनामानिगौणानिविख्यातानिमहात्मनः ॥ ऋषिभिः परिगीतानि तानिवक्ष्यामिभूतये ॥ १४ ॥ अस्यश्रीविष्णोर्दि

स्यसहस्रनामस्तोत्रमंत्रस्य ॥ भगवान्वेदव्यासऋषिः ॥ श्री
विष्णुः परमात्मादेवता ॥ अनुष्टुप्छंदः ॥ अमृतांशूद्भवो
भानुरितिबीजम् ॥ देवकीनंदनस्त्रष्टेतिशक्तिः ॥ त्रिसामा-
सामगःसामेतिहृदयं ॥ शंखभृन्नंदकीचक्रीतिकीलकम् ॥
शार्ङ्गधन्वागदाधरइत्यस्त्रम् ॥ रथांगपाणिरक्षोभ्यइतिक
वचम् ॥ उद्भवः क्षोभणोदेवइतिपरमोमंत्रः ॥ ॥ श्रीविष्णु
प्रीत्यर्थेजपेविनियोगः ॥ ॥ अथध्यानम् ॥ ॥ शांताकारंभु
जगशयनंपद्मनाभंसुरेशंविश्वाधारंगगनसदृशंमेघवर्णंशु
भांगम् ॥ लक्ष्मीकांतंकमलनयनंयोगिभिर्ध्यानगम्यंवंदेवि
ष्णुंभवभयहरंसर्वलोकैकनाथम् ॥ ॥ इतिध्यानम् ॥ ॐ—
विश्वंविष्णुर्वषट्कारोभूतभव्यभवत्प्रभुः ॥ भूतकृद्भूतभृद्भा

वोभूतात्माभूतभावनः ॥ १ ॥ पूतात्मापरमात्माचमुक्तानांप
रमागतिः ॥ अव्ययः पुरुषः साक्षीक्षेत्रज्ञोऽक्षरएवच ॥ २ ॥
योगोयोगविदांनेता प्रधानपुरुषेश्वरः ॥ नारसिंहवपुः श्री
मान्केशवः पुरुषोत्तमः ॥ ३ ॥ सर्वः शर्वः शिवः स्थाणुर्भूतादिर्नि
धिरव्ययः ॥ संभवोभावनोभर्ताप्रभवः प्रभुरीश्वरः ॥ ४ ॥ स्व
यंभूः शंभुरादित्यः पुष्कराक्षोमहास्वनः ॥ अनादिनिधनोधा
ताविधाताधातुरुत्तमः ॥ ५ ॥ अप्रमेयोहृषीकेशः पद्म-
नाभोऽमरप्रभुः ॥ विश्वकर्मामनुस्त्वष्टास्थविष्ठः स्थविरोध्रु
वः ॥ ६ ॥ अग्राह्यः शाश्वतः कृष्णोलोहिताक्षः प्रतर्दनः ॥
प्रभूतस्त्रिककुब्धामपवित्रंमंगलंपरम् ॥ ७ ॥ ईशानः प्राण
दः प्राणोज्येष्ठः श्रेष्ठः प्रजापतिः ॥ हिरण्यगर्भोभूगर्भो

माधवोमधुसूदनः ॥ ८ ॥ ईश्वरो विक्रमीधन्वीमेधावी विक्रमः क्रमः ॥ अनुत्तमोदुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ९॥
सुरेशः शरणंशर्म विश्वरेताः प्रजाभवः ॥ अहः संवत्सरोव्यालः प्रत्ययः सर्वदर्शनः ॥ १०॥ अजः सर्वेश्वरः सिद्धः सि-
द्धिः सर्वादिरच्युतः ॥ वृषाकपिरमेयात्मासर्वयोगविनिःसृतः ॥ ११॥ वसुर्वसुमनाः सत्यः समात्मासंमितः समः ॥ अमोघः पुंडरीकाक्षोवृषकर्मावृषाकृतिः ॥ १२॥ रुद्रोबहुशिराबभ्रुर्विश्वयोनिः शुचिश्रवाः ॥ अमृतः शाश्वतः स्थाणुर्वरा-
रोहोमहातपाः ॥ १३॥ सर्वगः सर्वविद्भानुर्विष्वक्सेनोजनार्दनः ॥ वेदोवेदविदव्यंगोवेदांगोवेदवित्कविः ॥ १४॥ लोकाध्यक्षः सुराध्यक्षोधर्माध्यक्षः कृताकृतः ॥ चतुरात्माचतु

वि. व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १५ ॥ भ्राजिष्णुर्भोजनंभोक्तास स
३ हिष्णुर्जगदादिजः ॥ अनघोविजयोजेताविश्वयोनिःपुनर्व-
सुः ॥ १६ ॥ उपेंद्रोवामनः प्रांशुरमोघः शुचिरूर्जितः ॥ अ-
तींद्रः संग्रहः सर्गोधृतात्मानियमोयमः ॥ १७ ॥ वेद्योवैद्यः स
दायोगीवीरहामाधवोमधुः ॥ अतींद्रियोमहामायोमहोत्सा
होमहाबलः ॥ १८ ॥ महाबुद्धिर्महावीर्योमहाशक्तिर्महाद्युतिः
॥ अनिर्देश्यवपुः श्रीमानमेयात्मामहाद्रिधृक् ॥ १९ ॥ महेष्वा
सोमहीभर्ताश्रीनिवासःसतांगतिः ॥ अनिरुद्धःसुरानंदोगो
विंदोगोविदांपतिः ॥ २० ॥ मरीचिर्दमनोहंसः सुपर्णोभुज
गोत्तमः ॥ हिरण्यनाभःसुतपाःपद्मनाभःप्रजापतिः ॥ २१ ३
॥ अमृत्युःसर्वदृक्सिंहःसंधातासंधिमान्स्थिरः ॥ अजो

दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥२२॥ गुरुर्गुरुतमोधा
मसत्यःसत्य पराक्रमः॥ निमिषोनिमिषः स्रग्वीवाचस्पति
रुदारधीः ॥२३॥ अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेतास-
मीरणः ॥सहस्रमूर्धाविश्वात्मासहस्राक्षःसहस्रपात् ॥२४
आवर्तनोनिवृत्तात्मासंवृतः संप्रमर्दनः॥अहः संवर्तकोवह्नि
रनिलोधरणीधरः॥२५॥सुप्रसादः प्रसन्नात्मा विश्वधृ
ग्विश्वभुग्विभुः॥ सत्कर्तासत्कृतिः साधुर्जह्नुर्नारायणो
नरः॥२६॥ असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः
॥ सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥२७॥
वृषाहीवृषभोविष्णुर्वृषपर्वावृषोदरः॥ वर्धनोवर्धमानश्च
विविक्तः श्रुतिसागरः ॥ २८॥ सुभुजोदुर्धरोवाग्मीमहेन्द्रो

वसुदो वसुः ॥ नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥
२९॥ ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः॥ ऋद्धः स्प
ष्टाक्षरो मंत्रश्चंद्रांशुर्भास्करद्युतिः ॥ ३०॥ अमृतांशूद्भवो भा
नुः शशबिंदुः सुरेश्वरः ॥ औषधं जगतः सेतुः सत्यधर्मपरा
क्रमः ॥ ३१॥ भूतभव्यभवन्नाथः पवनः पावनोऽनलः ॥ का
महा कामकृत्कांतः कामः कामप्रदः प्रभुः ॥ ३२॥ युगादिकृ-
द्युगावर्तो नैकमायो महाशनः ॥ अदृश्यो व्यक्तरूपश्च सहस्र
जिदनंतजित् ॥ ३३॥ इष्टो विशिष्टः शिष्टेष्टः शिखंडी नहुषो वृ
षः ॥ क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ ३४॥ अच्यु
तः प्रथितः प्राणः प्राणदो वासवानुजः ॥ अपांनिधिरधिष्ठान
मप्रमत्तः प्रतिष्ठितः ॥ ३५॥ स्कंदः स्कंदधरो धुर्यो वरदो वा

सुवाहनः॥ वासुदेवोबृहद्भानुरादिदेवः पुरंदरः॥ ३६॥ अशो
कस्तारणस्तारः शूरःशौरिर्जनेश्वरः॥ अनुकूलः शतावर्तःप
द्मीपद्मनिभेक्षणः॥ ३७॥ पद्मनाभोऽरविंदाक्षः पद्मगर्भः
शरीरभृत्॥ महर्द्धिरृद्धोवृद्धात्मामहाक्षोगरुडध्वजः॥ ३८
॥ अतुलः शरभोभीमः समयज्ञोहविर्हरिः॥ सर्वलक्षणलक्ष
ण्योलक्ष्मीवान्समितिंजयः॥ ३९॥ विक्षरोरोहितोमार्गोहेतु
र्दामोदरः सहः॥ महीधरोमहाभागोवेगवानमिताशनः॥ ४०
॥ उद्भवः क्षोभणोदेवः श्रीगर्भः परमेश्वरः॥ करणंकारणंक
र्ताविकर्तागहनो गुहः॥ ४१॥ व्यवसायोव्यवस्थानः संस्था
नः स्थानदोध्रुवः॥ परर्द्धिः परम स्पष्टः तुष्टः पुष्टः शुभेक्ष
णः॥ ४२॥ रामोविरामोविरजोमार्गोनेयोनयोऽनयः॥ वीरः

शक्तिमतांश्रेष्ठोधर्मोधर्मविदुत्तमः ॥ ४३ ॥ वैकुंठः पुरुषः प्राणः
प्राणदः प्रणवः पृथुः ॥ हिरण्यगर्भः शत्रुघ्नोव्याप्तोवायुरधोक्ष
जः ॥४४॥ ऋतुः सुदर्शनः कालः परमेष्ठीपरिग्रहः ॥उग्रःसं
वत्सरोदक्षोविश्रामोविश्वदक्षिणः ॥४५॥ विस्तारः स्थावरः
स्थाणुः प्रमाणंबीजमव्ययम् ॥ अर्थोऽनर्थोमहाकोशोमहा
भोगोमहाधनः ॥ ४६ ॥ अनिर्विण्णः स्थविष्ठोभूर्धर्मयूपोम-
हामखः ॥ नक्षत्रनेमिर्नक्षत्रीक्षमः क्षामः समीहनः ॥ ४७ ॥-
यज्ञइज्योमहेज्यश्चक्रतुःसत्रंसतांगतिः ॥सर्वदर्शीविमुक्ता
त्मासर्वज्ञोज्ञानमुत्तमम् ॥४८॥ सुव्रतः सुमुखः सूक्ष्मः सु
घोषः सुखदः सुहृत् ॥ मनोहरोजितक्रोधोवीरबाहुर्विदारणः
॥४९॥ स्वापनः स्ववशोव्यापीनैकात्मानैककर्मकृत् ॥ वत्स

रोवत्सलोवत्सीरत्नगर्भोधनेश्वरः ॥५०॥ धर्मगुब्धर्मकृद्धर्मी
सदसत्क्षरमक्षरम् ॥ अविज्ञातासहस्रांशुर्विधाताकृतलक्ष
णः ॥५१॥ गभस्तिनेमिः सत्वस्थः सिंहो भूतमहेश्वरः ॥ आ
दिदेवोमहादेवो देवेशोदेवभृद्गुरुः ॥५२॥ उत्तरोगोपतिर्गो
प्ताज्ञानगम्यः पुरातनः ॥ शरीरभूतभृद्भोक्ताकपींद्रोभूरिद-
क्षिणः ॥५३॥ सोमपोमृतपः सोमः पुरुजित्पुरुसत्तमः ॥ वि
नयोजयः सत्यसंधोदाशार्हः सात्वतांपतिः ॥५४ ॥ जीवो
विनयितासाक्षीमुकुंदोऽमितविक्रमः ॥ अंभोनिधिरनंतात्मा
महोदधिशयोंतकः ॥५५॥ अजोमहार्हः स्वाभाव्योजितामि
त्रः प्रमोदनः ॥ आनंदोनंदनोनंदः सत्यधर्मात्रिविक्रमः ॥
५६॥ महर्षिः कपिलाचार्यः कृतज्ञोमेदिनीपतिः ॥ त्रिपद-

स्त्रिदशाध्यक्षोमहाशृंगः कृतांतकृत् ॥५७॥ महावराहोगो
विंदःसुषेणः कनकांगदी ॥ गुह्योगभीरोगहनोगुप्तश्चक्रगदाध
रः ॥५८॥ वेधाःस्वांगोजितःकृष्णोदृढःसंकर्षणोऽच्युतः ॥ व
रुणोवारुणोवृक्षःपुष्कराक्षोमहामनाः ॥५९॥ भगवान्भगहा
नंदीवनमालीहलायुधः ॥ आदित्योज्योतिरादित्यःसहिष्णु
र्गतिसत्तमः ॥६०॥ सुधन्वाखंडपरशुर्दारुणोद्रविणप्रदः
॥ दिविस्पृक् सर्वदृग्व्यासोवाचस्पतिरयोनिजः ॥६१॥ त्रि
सामासामगःसामनिर्वाणंभेषजंभिषक् ॥ सन्यासकृच्छमः
शांतोनिष्ठाशांतिःपरायणः ॥६२॥ शुभांगः शांतिदःस्रष्टा
कुमुदःकुवलेशयः ॥ गोहितोगोपतिर्गोप्तावृषभाक्षोवृषप्रि
यः ॥६३॥ अनिवर्तीनिवृत्तात्मासंक्षेप्ताक्षेमकृच्छिवः ॥ श्री

वत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः श्रीदः श्रीशः श्री
निवासः श्रीनिधिः श्रीविभावनः॥ श्रीधरः श्रीकरः श्रेयः
श्रीमांल्लोकत्रयाश्रयः ॥६५॥स्वक्षः स्वंगः शतानंदोनंदि
र्ज्योतिर्गणेश्वरः॥ विजितात्माविधेयात्मासत्कीर्तिश्छि
न्नसंशयः॥६६॥उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थि
रः॥ भूशयोभूषणोभूतिर्विशोकः शोकनाशनः॥६७॥अर्चि
ष्मानर्चितःकुंभोविशुद्धात्माविशोधनः॥ अनिरुद्धोप्रतिर
थः प्रद्युम्नोमितविक्रमः॥६८॥कालनेमिनिहावीरः शौरिः
शूरजनेश्वरः॥ त्रिलोकात्मात्रिलोकेशः केशवः केशिहा
हरिः॥६९॥कामदेवः कामपालः कामीकांतः कृतागमः॥अ
निर्देश्यवपुर्विष्णुर्वीरोऽनंतोधनंजयः॥७०॥ब्रह्मण्योब्रह्मकृ

ा: ह्मा ब्रह्म ब्रह्मविवर्धनः॥ ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्रा स-
ह्मणप्रियः॥७१॥ महाक्रमो महाकर्मा महातेजा महोरगः॥
महाक्रतुर्महायज्वा महायज्ञो महाहविः॥७२॥ स्तव्यस्तव
प्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः॥ पूर्णः पूरयिता पुण्यः पु
ण्यकीर्तिरनामयः॥ मनोजवस्तीर्थकरो वसुरेता वसुप्रदः॥
वसुप्रदो वासुदेवो वसुर्वसुमना हविः॥७४॥ सद्गतिः सत्कृतिः
सत्ता सद्भूतिः सत्परायणः॥ शूरसेनो यदुश्रेष्ठः सन्निवासः सु
यामुनः॥७५॥ भूतावासो वासुदेवः सर्वासुनिलयो नलः॥
दर्पहा दर्पदो दृप्तो दुर्धरोथापराजितः॥७६॥ विश्वमूर्तिर्महामू
र्तिर्दीप्तमूर्तिरमूर्तिमान्॥ अनेकमूर्तिरव्यक्तः शतमूर्तिः शता ७
ननः॥७७॥ एको नैकः सवः कः किं यत्तत्पदमनुत्तमम्॥ लोक

बंधुर्लोकनाथोमाधवोभक्तवत्सलः ॥ ७८ ॥ सुवर्णवर्णोहेमां
गोवरांगश्चंदनांगदी ॥ वीरहाविषमः शून्योधृताशीरचलश्च
लः ॥ ७९ ॥ अमानीमानदोमान्योलोकस्वामीत्रिलोकधृक् ॥
सुमेधामेधजो धन्यः सत्यमेधाधराधरः ॥ ८० ॥ तेजोवृषोद्यु-
तिधरः सर्वशस्त्रभृतांवरः ॥ प्रग्रहोनिग्रहोव्यग्रोनैकशृंगोगदा
ग्रजः ॥ ८१ ॥ चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ॥ चतुरा-
त्माचतुर्भावश्चतुर्वेदविदेकपात् ॥ ८२ ॥ समावर्तोनिवृत्तात्मादु
र्जयोदुरतिक्रमः ॥ दुर्लभोदुर्गमोदुर्गोदुरावासोदुरारिहा ॥ ८३ ॥
शुभांगोलोकसारंगः सुतंतुस्तंतुवर्धनः ॥ इंद्रकर्मामहाकर्मा
कृतकर्माकृतागमः ॥ ८४ ॥ उद्भवः सुंदरः सुंदोरत्ननाभसुलो
चनः ॥ अर्कोवाजिसनः शृंगीजयंतः सर्वविज्जयी ॥ ८५ ॥

सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरेश्वरः ॥ महाह्रदोमहागर्तोम
हाभूतोमहानिधिः ॥ ८६ ॥ कुमुदः कुंदरः कुंदः पर्जन्यःपावनोनि-
लः ॥ अमृतांशोमृतवपुःसर्वज्ञःसर्वतोमुखः ॥ ८७ ॥ सुलभः-
सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ॥ न्यग्रोधोदुंबरोश्वत्थ
श्चाणूरांध्रनिषूदनः ॥ ८८ ॥ सहस्रार्चिःसप्तजिह्वःसप्तैधाः
सप्तवाहनः ॥ अमूर्तिरनघोचिंत्योभयकृद्भयनाशनः ॥ ८९ ॥
अणुर्बृहत्कृशःस्थूलोगुणभृन्निर्गुणोमहान् ॥ अधृतःस्वधृतः
स्वास्यःप्राग्वंशोवंशवर्धनः ॥ ९० ॥ भारभृत्कथितोयोगीयोगी
शःसर्वकामदः ॥ आश्रमःश्रमणःक्षामःसुपर्णोवायुवाहनः ॥
९१ ॥ धनुर्धरोधनुर्वेदोदंडोदमयितादमः ॥ अपराजितःसर्वसहो
नियंतानियमोयमः ॥ ९२ ॥ सत्ववान्सात्विकःसत्यःसत्यधर्मपरा

वाच ॥ ॥ जगत्प्रभुं देवदेवमनंतं पुरु
षोत्तमम् ॥ स्तुवन्नामसहस्रेण पुरु
षः सततोत्थितः ॥ ६ ॥ तमेव चार्च्चय
न्नित्यं भक्त्या पुरुषमव्ययम् ॥ ध्या
यन्स्तुवन्नमस्यंश्च यजमानस्तमेव
च ॥ ७ ॥ अनादिनिधनं विष्णुं सर्वलो
कमहेश्वरम् ॥ लोकाध्यक्षंस्तुवन्नित्यं

वि॰ सर्वदुःखातिगो भवेत् ॥ ८ ॥ ब्रह्मण्यं स॰
२ सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ॥
लोकनाथं महद्भूतं सर्वभूतभवोद्भव
म् ॥ ९ ॥ एष मे सर्वधर्माणां धर्मोऽधि
कतमो मतः ॥ यद्भक्त्या पुंडरीकाक्षं
स्तवैरर्चेन्नरः सदा ॥ १० ॥ परमं यो म २
हत्तेजः परमं यो महत्तपः ॥ परमं यो म

हद्ब्रह्म परमं यः परायणम् ॥११॥ पवि
त्राणां पवित्रं यो मंगलानांच मंगल
म् ॥ दैवत देवतानांच भूतानां योव्य
यः पिता ॥१२॥ यतः सर्वाणि भूता
नि भवंत्यादियुगागमे ॥ यस्मिंश्च
प्रलयं यान्ति पुनरेव युगक्षये ॥१३
॥ तस्य लोकप्रधानस्य जगन्नाथस्य

भूपते ॥ विष्णोर्नामसहस्रं मे शृणु
पापभयापहम् ॥ १४ ॥ यानि नामा
नि गौणानि विख्यातानि महात्मनः
॥ ऋषिभिः परिगीतानि तानि वक्ष्या
मि भूतये ॥ १५ ॥ ऋषिर्नाम्नां सहस्र
स्य वेदव्यासो महामुनिः ॥ छंदोऽनु
ष्टुप्तथा देवो भगवान्देवकीसुतः ॥

॥१६॥ विष्णुंजिष्णुंमहाविष्णुं प्रभ
विष्णुं महेश्वरं ॥ अनेकरूपदैत्यांतं
॥ ॐ ॥
नमामि पुरुषोत्तमम् ॥१७॥ अस्य
श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रम
हामंत्रस्य भगवान्वेदव्यासऋषिः
अनुष्टुप्छंदः ॥ श्रीकृष्णःपरमात्मा
श्रीमन्नारायणोदेवता ॥ अमृतांशू

द्धवोभानुरितिबीजं॥देवकीनंदनः स्त्रष्टेतिशक्तिः॥शंखभृन्नंदकीचक्री तिकीलकम्॥ श्रीकृष्णप्रीत्यर्थेसह स्त्रनामजपेविनियोगः॥ अथकरन्या सः॥ॐउद्धवाय अंगुष्ठाभ्यांनमः ॥ॐक्षोभणाय तर्जनीभ्यांनमः॥ ॐदेवायमध्यमाभ्यांनमः॥ॐउ

द्भवाय अनामिकाभ्यां नमः ॥ ॐ क्षो
भणाय कनिष्ठिकाभ्यां नमः ॥ ॐ दे
वाय करतलकरपृष्ठाभ्यां नमः ॥ इति
करन्यासः ॥ अथ हृदयादि षडंगन्या
सः ॥ सुहृत्तः सुमुखः सूक्ष्मः ज्ञानाय
हृदयाय नमः ॥ सहस्त्रमूर्धा विश्वात्मा
ऐश्वर्याय शिरसे स्वाहा ॥ सहस्त्रार्चिः

वि॰ सनजिह्वः शक्त्यै शिखायै वषट्॥ त्रि स॰
सामा सामगः साम बलाय कवचाय हुं
॥ रथांगपाणिरक्षोभ्यः तेजसे नेत्रा
भ्यां वौषट्॥ शार्ङ्गधन्वा गदाधरः वी
र्याय अस्त्राय फट्॥ ऋतुः सुदर्शनः
कालः भुर्भुवःस्वरोम् दिग्बंधः॥ इति ५
हृदयादिन्यासः॥ अथध्यानं॥ ॥

ॐ क्षीरोदन्वत्प्रदेशे शुचिमणिवि
लसत्सैकते मौक्तिकानां मालाक्लृ
प्तासनस्थः स्फटिकमणिनिभैर्मौ-
क्तिकैर्मंडितांगः ॥ शुभ्रैरभ्रैरदभ्रै
रुपरिविरचितैर्मुक्तपीयूषवर्षैरान
न्दी नः पुनीयादरिनलिनगदाशंख-
पाणिर्मुकुंदः ॥ १ ॥ अथवा ॥ भूः पा-

वि. दौ यस्य नाभिर्वियदसुरनिलश्चंद्रसू स.
५ र्यौच नेत्रे कर्णावाशाःशिरोद्यौर्मुख
मपिदहनोयस्यवास्तेयमब्धिः॥अं
तस्थं यस्यविश्वंसुरनरखगगोभो
गिगंधर्वदैत्यैश्चित्रंरंरम्यतेतंत्रिभुव
नवपुषंविष्णुमीशंनमामि॥२॥अ ५
थवा॥शांताकारंभुजगशयनंपद्म

नाभं सुरेशं विश्वाधारं गगनसदृशं
मेघवर्णं शुभांगं ॥ लक्ष्मीकांतं कम
लनयनं योगिभिर्ध्यानगम्यं वंदे वि
ष्णुं भवभयहरं सर्वलोकैकनाथम् ॥
॥ ३ ॥ अथवा ॥ मेघश्यामं पीतकौशे
यवासं श्रीवत्सांकं कौस्तुभोद्भासितां
गम् ॥ पुण्योपेतं पुंडरीकायताक्षं वि

वि ष्णुंवंदेसर्वलोकैकनाथम्॥४॥अ स
७ थवा॥सशंखचक्रंसकिरीटकुंडलं
सपीतवस्त्रंसरसीरुहेक्षणम्॥सहा
रवक्षस्थलकौस्तुभश्रियंनमामिवि
ष्णुंशिरसाचतुर्भुजम्॥५॥ ॥ॐ
विश्वंविष्णुर्वषट्कारो भूतभव्यभ ७
वत्प्रभुः॥भूतकृद्भूतभृद्भावो भूता

त्मा भूतभावनः ॥१॥ पूतात्मा परमा
त्मा च मुक्तानां परमागतिः ॥ अव्ययः
पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ २
॥ योगो योगविदां नेता प्रधानपुरुषेश्व
रः ॥ नारसिंहवपुः श्रीमान्केशवः पुरु
षोत्तमः ॥ ३ ॥ सर्वः शर्वः शिवः स्थाणु
र्भूतादिर्निधिरव्ययः ॥ संभवो भाव

वि नोभर्त्ता प्रभवः प्रभुरीश्वरः ॥ ४ ॥ स्व स.
८ यंभूः शंभुरादित्यः पुष्कराक्षो महास्व
नः ॥ अनादिनिधनो धाता विधाता धा
तुरुत्तमः ॥ ५ ॥ अप्रमेयो हृषीकेशः प
द्मनाभोऽमरप्रभुः ॥ विश्वकर्मा मनु
स्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ ६ ॥ ८
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः

प्रतर्द्दनः॥ प्रभूतस्त्रिककुब्धाम पवि
त्रं मंगलं परम्॥७॥ ईशानः प्राणदः
प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः॥ हिरण्य
गर्भो भूगर्भो माधवो मधुसूदनः॥८
॥ईश्वरो विक्रमी धन्वी मेधावी विक्र
मः क्रमः॥ अनुत्तमो दुराधर्षः कृतज्ञः
कृतिरात्मवान्॥९॥ सुरेशः शरणं शा

वि. मे विश्वरेताः प्रजाभवः ॥ अहः संव स.
१ त्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥१०
॥ अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादि
रच्युतः ॥ वृषाकपिरमेयात्मा सर्वयोग
विनिःसृतः ॥११॥ वसुर्वसुमनाः स
त्यः समात्मा संमितः समः ॥ अमोघः १
पुंडरीकाक्षो वृषकर्मा वृषाकृतिः ॥१२

॥ रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः॥ अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः॥१३॥ सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः॥ वेदो वेदविदव्यंगो वेदांगो वेदवित्कविः॥१४॥ लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः॥ चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतु

भुजः॥१५॥भ्राजिष्णुर्भोजनं भोक्ता
सहिष्णुर्जगदादिजः॥अनघो विजयो
जेता विश्वयोनिः पुनर्वसुः॥१६॥उपे
न्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः॥
अतींद्रः संग्रहः सर्गो धृतात्मा नियमो य
मः॥१७॥वेद्यो वैद्यः सदायोगी वीरहा मा
धवो मधुः॥अतींद्रियो महामायो महो-

त्साहो महाबलः ॥१८॥ महाबुद्धिर्महावी
र्यो महाशक्तिर्महाद्युतिः ॥ अनिर्देश्यवपुः
श्रीमानमेयात्मा महाद्रिधृक् ॥१९॥ महे
ष्वासो महीभर्ता श्रीनिवासः सतांगतिः
॥ अनिरुद्धः सुरानंदो गोविंदो गोविदांप
तिः ॥२०॥ मरीचिर्दमनो हंसः सुपर्णो भु
जगोत्तमः ॥ हिरण्यनाभः सुतपाः पद्म

नाभःप्रजापतिः॥२१॥ अमृत्युःसर्वदृक्
सिंहःसंधातासंधिमान् स्थिरः॥ अजो
दुर्मर्षणःशास्ता विश्रुतात्मासुरारिहा॥
॥२२॥ गुरुर्गुरुतमोधाम सत्यःसत्यप
राक्रमः॥निमिषोऽनिमिषःस्रग्वी वाच
स्पतिरुदारधीः॥२३॥ अग्रणीर्ग्रामणीः
श्रीमान्न्यायो नेता समीरणः॥ सहस्र

मूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात्
॥२४॥ आवर्तनो निवृत्तात्मा संवृतः सं
प्रमर्दनः॥ अहः संवर्त्तको वह्निरनिलो
धरणीधरः॥२५॥ सुप्रसादः प्रसन्ना-
त्मा विश्वधृग्विश्वभुग्विभुः॥ सत्कर्त्ता
सत्कृतः साधुर्ज्जह्नुर्नारायणो नरः॥२६
॥ असंख्येयोऽप्रमेयात्मा विशिष्टः शि

ष्टकृच्छुचिः॥ सिद्धार्थः सिद्धसंकल्पः
सिद्धिदः सिद्धिसाधनः॥२७॥ वृषाही
वृषभो विष्णुर्वृषपर्वा वृषोदरः॥ वर्द्धनो
वर्द्धमानश्च विविक्तः श्रुतिसागरः॥२८
॥सुभुजो दुर्धरो वाग्मी महेंद्रो वसुदो व
सुः॥ नैकरूपो बृहद्रूपः शिपिविष्टः प्रका
शनः॥२९॥ ओजस्तेजो द्युतिधरः प्रका

शात्मा प्रतापनः ॥ ऋद्धः स्पष्टाक्षरो मंत्र
श्चंद्रांशुर्भास्करद्युतिः ॥ ३० ॥ अमृतांशू
द्भवो भानुः शशबिंदुः सुरेश्वरः ॥ औषधं
जगतः सेतुः सत्यधर्मपराक्रमः ॥ ३१ ॥ भू
तभव्यभवन्नाथः पवनः पावनोनलः ॥
कामहा कामकृत्कांतः कामः कामप्रदः
प्रभुः ॥ ३२ ॥ युगादिकृद्युगावर्तोऽनैक

वि॰ मायोमहाशनः॥अदृश्योव्यक्तरूपश्चस स॰
१३ हस्रजिदनंताजित्॥३३॥इष्टोविशिष्टः
शिष्टेष्टःशिखंडीनहुषोवृषः॥क्रोधहा
क्रोधकृत्कर्ताविश्वबाहुर्महीधरः॥३४॥
अच्युतःप्रथितःप्राणःप्राणदोवासवा
नुजः॥अपांनिधिरधिष्ठानमप्रमत्तःप्र १३
तिष्ठितः॥३५॥स्कंदःस्कंदधरोधुर्योवर

दोवायुवाहनः॥ वासुदेवोबृहद्भानुरादि
देवः पुरंदरः॥ ३६॥ अशोकस्तारणस्ता
रः शूरः शौरिर्जिनेश्वरः॥ अनुकूलः श
तावर्त्तः पद्मी पद्मनिभेक्षणः॥ ३७॥ प
द्मनाभोऽरविंदाक्षः पद्मगर्भः शरीरभृ
त्॥ महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरु
डध्वजः॥ ३८॥ अतुलः शरभो भीमः

समयज्ञो हविर्हरिः ॥ सर्वलक्षणलक्ष
ण्यो लक्ष्मीवान्समितिंजयः ॥ ३९ ॥ वि
क्षरो रोहितो मार्गो हेतुर्दामोदरस्सहः ॥
महीधरो महाभागो वेगवानमिताशनः
॥ ४० ॥ उद्भवः क्षोभणो देवः श्रीगर्भः प
रमेश्वरः ॥ करणं कारणं कर्ता विकर्तागि
हनो गुहः ॥ ४१ ॥ व्यवसायो व्यवस्थानः

संस्थानः स्थानदो ध्रुवः ॥ परर्धिः परमः
स्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ४२ ॥ रामो
विरामो विरजो मार्गो नेयो नयोऽनयः ॥
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्त
मः ॥ ४३ ॥ वैकुंठः पुरुषः प्राणः प्राणदः प्र
णवः पृथुः ॥ हिरण्यगर्भः शत्रुघ्नो व्या-
प्तोवायुरधोक्षजः ॥ ४४ ॥ ऋतुः सुदर्श

वि॰ नःकालःपरमेष्ठीपरिग्रहः॥उग्रस्संव- स॰
१५ त्सरोदक्षो विश्रामो विश्वदक्षिणः॥४५
॥विस्तारःस्थावरःस्थाणुःप्रमाणंबी
जमव्ययम्॥ अर्थोऽनर्थोमहाकोशो म
हाभोगोमहाधनः॥४६॥ अनिर्विण्णः
स्थविष्ठोभूर्धर्मयूपो महामखः॥ नक्ष १५
त्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः

॥४७॥ यज्ञइज्योमहेज्यश्चक्रतुःसत्रं
सतांगतिः॥ सर्वदर्शीविमुक्तात्मासर्व
ज्ञोज्ञानमुत्तमम्॥४८॥ सुव्रतःसुमु
खःसूक्ष्मःसुघोषःसुखदःसुहृत्॥ मनो
हरोजितक्रोधोवीरबाहुर्विदारणः॥४९
॥ स्वापनःस्ववशोव्यापीनैकात्मानैक
कर्मकृत्॥ वत्सरोवत्सलोवत्सीरत्नग

वि. भौधनेश्वरः ॥५०॥ धर्मगुब्धर्मकृद्धर्मी स.
१६ सदसत्क्षरमक्षरम् ॥ अविज्ञाता सह
स्रांशुर्विधाता कृतलक्षणः ॥५१॥ गभ
स्तिनेमिः सत्वस्थः सिंहो भूतमहेश्वरः
॥ आदिदेवो महादेवो देवेशो देवभृद्गुरुः
॥५२॥ उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः १६
पुरातनः ॥ शरीरभूतभृद्भोक्ता कपीं

द्रो भूरिदक्षिणः॥५३॥सोमपोऽमृत
पस्सोमः पुरुजित्पुरुसत्तमः॥विनयो
जयस्सत्यसंधोदाशार्हस्सात्वतांपतिः
॥५४॥जीवो विनयितासाक्षी मुकुंदोऽ
मितविक्रमः॥अंभोनिधिरनंतात्माम
होदधिशयोंतकः॥५५॥अजोमहार्हः
स्वाभाव्यो जितामित्रः प्रमोदनः॥आ

वि. नंदोनंदनोनंदःसत्यधर्मा त्रिविक्रमः॥ स.
१७ ॥५६॥ महर्षिःकपिलाचार्यःकृतज्ञो मे
दिनीपतिः॥ त्रिपदस्त्रिदशाध्यक्षो महा
शृंगःकृतांतकृत्॥५७॥ महावराहो गो
विंदःसुषेणःकनकांगदी॥ गुह्यो गभी
रो गहनो गुप्तश्चक्रगदाधरः॥५८॥ वे १७
धाःस्वांगो जितःकृष्णो दृढःसंकर्षणो

च्युतः॥ वरुणो वारुणो वृक्षः पुष्कराक्षो
महामनाः॥५९॥ भगवान् भगहानंदी
वनमाली हलायुधः॥ आदित्यो ज्योति
रादित्यः सहिष्णुर्गतिसत्तमः॥६०॥ सु
धन्वा खंडपरशुर्दारुणो द्रविणप्रदः॥
दिवस्पृक्सर्वदृग्व्यासो वाचस्पतिरयो
निजः॥६१॥ त्रिसामा सामगः साम नि

वि वर्णंभेषजं भिषक्॥संन्यासकृच्छमः स.
१८ शांतो निष्ठाशांतिःपरायणः॥६२॥शु
भांगःशांतिदःस्रष्टाकुमुदःकुवलेश-
यः॥गोहितो गोपतिर्गोप्ता वृषभाक्षो
वृषप्रियः॥६३॥अनिवर्ती निवृत्तात्मा
संक्षेप्ता क्षेमकृच्छिवः॥श्रीवत्सवक्षाःश्री १८
वासःश्रीपतिःश्रीमतांवरः॥६४॥श्रीदः

श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभा
वनः ॥ श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लो
कत्रयाश्रयः ॥ ६५ ॥ स्वक्षः स्वंगः श
तानंदो नंदिर्ज्योतिर्गणेश्वरः ॥ विजि
तात्मा विधेयात्मा सत्कीर्तिश्छिन्नसं
शयः ॥ ६६ ॥ उदीर्णः सर्वतश्चक्षुरनीशः
शाश्वतः स्थिरः ॥ भूशयो भूषणो भू

तिर्विशोकः शोकनाशनः ॥६७॥ अ
र्चिष्मानर्चितः कुंभो विशुद्धात्मा विशो
धनः ॥ अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽ
मितविक्रमः ॥६८॥ कालनेमिनिहा वी
रः शौरिः शूरजनेश्वरः ॥ त्रिलोकात्मा
त्रिलोकेशः केशवः केशिहा हरिः ॥६९॥
कामदेवः कामपालः कामी कांतः कृताग

मः ॥ अनिर्देश्यवपुर्विष्णुर्वीरोऽनंतो ध
नंजयः ॥ ७० ॥ ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा
ब्रह्म ब्रह्मविवर्द्धनः ॥ ब्रह्मविद्ब्राह्मणो
ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ७१ ॥ म
हाक्रमो महाकर्मा महातेजा महोरगः
॥ महाक्रतुर्महायज्वा महायज्ञो महाह
विः ॥ ७२ ॥ स्तव्यः स्तवप्रियः स्तोत्रं स्तु

वि॰ ति:स्तोतारणप्रिय:॥पूर्ण:पूरयितापु स॰
२० ण्य:पुण्यकीर्तिरनामय:॥७३॥मनो
जवस्तीर्थकरोवसुरेतावसुप्रद:॥वसु
प्रदोवासुदेवोवसुर्वसुमनाहवि:॥७४
॥सद्गति:सत्कृति:सत्तासद्भूति:सत्प
रायण:॥शूरसेनोयदुश्रेष्ठ:सन्निवा २०
स:सुयामुन:॥७५॥भूतावासोवासु

देवःसर्वासुनिलयोऽनलः॥दर्पहादर्प
दोदृप्तोदुर्धरोऽथापराजितः॥७६॥
विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्ति
मान्॥अनेकमूर्तिरव्यक्तःशतमूर्तिः
शताननः॥७७॥एकोनैकःसवःकः
किं यत्तत्पदमनुत्तमम्॥लोकबंधुर्लो
कनाथोमाधवो भक्तवत्सलः॥७८॥

वि॰ सुवर्णवर्णो हेमांगो वरांगश्चंदनांगदी स॰
२१ ॥ वीरहा विषमः शून्यो घृताशीरचल
श्चलः ॥ ७९ ॥ अमानी मानदो मान्यो
लोकस्वामी त्रिलोकधृक् ॥ सुमेधा मे
धजो धन्यः सत्यमेधा धराधरः ॥ ८०
॥ तेजो वृषो द्युतिधरः सर्वशस्त्र भृतां २१
वरः ॥ प्रग्रहो निग्रहो व्यग्रो नैकशृंगो

गदाग्रजः ॥ ८१ ॥ चतुर्मूर्तिश्चतुर्बाहुश्च
तुर्व्यूहश्चतुर्गतिः ॥ चतुरात्मा चतुर्भा
वश्चतुर्वेदविदेकपात् ॥ ८२ ॥ समाव
र्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः ॥
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा
॥ ८३ ॥ शुभांगो लोकसारंगः सुतंतुस्तं
तुवर्द्धनः ॥ इंद्रकर्मा महाकर्मा कृतक

र्मा कृतागमः ॥ ८४ ॥ उद्भवः सुंदरः स्कं
दो रत्ननाभः सुलोचनः ॥ अर्को वाज
सनः शृंगी जयंतस्सर्व विज्जयी ॥ ८५ ॥
सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरेश्व
रः ॥ महान्ह्रदो महागर्तो महाभूतो महा
निधिः ॥ ८६ ॥ कुमुदः कुंदरः कुंदः पर्ज
न्यः पावनो निलः ॥ अमृतांशोऽमृतव

पुः सर्वज्ञः सर्वतोमुखः ॥ ८७ ॥ स्कल
भः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ॥
न्यग्रोधोदुंबरोश्वत्थश्चाणूरांध्रनिषूदनः
॥ ८८ ॥ सहस्रार्चिः सप्तजिह्वः सप्तैधाः स
प्तवाहनः ॥ अमूर्तिरनघोऽचिंत्योभयकृ
द्भयनाशनः ॥ ८९ ॥ अणुर्बृहत्कृशः स्थू
लो गुणभृन्निर्गुणोमहान् ॥ अधृतः स्व

धृतःस्वास्यःप्राग्वंशोवंशवर्धनः॥९०॥
भारभृत्कथितोयोगी योगीशःसर्वका
मदः॥आश्रमःश्रमणःक्षामःसुपर्णो
वायुवाहनः॥९१॥ धनुर्धरोधनुर्वेदो दं
डो दमयिता दमः॥ अपराजितःसर्वस
हो नियंता नियमोयमः॥९२॥सत्ववा
न्सात्विकःसत्यःसत्यधर्मपरायणः॥

अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीति
वर्धनः॥९३॥ विहायसगतिर्ज्योतिः सु
रुचिर्हुतभुग्विभुः॥रविर्विरोचनः सूर्य्यः
सविता रविलोचनः॥९४॥ अनंतो हुत
भुग् भोक्ता सुखदो नैकजोऽग्रजः॥
अनिर्विण्णः सदामर्षी लोकाधिष्ठा
नम्द्भुतः॥९५॥ सनात्सनातनतमः

वि· कपिलः कपिरव्ययः ॥ स्वस्तिदः स्व- स·
२४ स्तिकृत्स्वस्ति स्वस्तिभुक् स्वस्तिदक्षि
णः ॥ ९६ ॥ अरौद्रः कुंडली चक्री विक्र
म्यूर्जितशासनः ॥ शब्दातिगः शब्द
सहः शिशिरः शर्वरीकरः ॥ ९७ ॥ अ
क्रूरः पेशलो दक्षो दक्षिणः क्षमिणां २४
वरः ॥ विद्वत्तमो वीतभयः पुण्यश्रवण

कीर्तनः॥९८॥उत्तारणो दुष्कृतिहा पु
ण्यो दुःस्वप्ननाशनः॥वीरहारक्षणः
संतोजीवनःपर्यवस्थितः॥९९॥अ
नंतरूपोनंतश्रीर्जितमन्युर्भयापहः
॥चतुरस्रोगभीरात्मा विदिशो व्यादि
शो दिशः॥१००॥अनादिर्भूर्भुवो ल-
क्ष्मीःसुवीरो रुचिरांगदः॥जननोजन

 जन्मादिर्भीमो भीमपराक्रमः ॥१०१
 ॥आधारनिलयो धाता पुष्पहासः प्र
जागरः ॥ऊर्ध्वगः सत्पथाचारः प्राण
दः प्रणवः पणः ॥२॥ प्रमाणं प्राणनि
लयः प्राणभृत्प्राणजीवनः ॥ तत्त्वं त
त्त्वविदेकात्मा जन्ममृत्युजरातिगः ३
भूर्भुवःस्वस्तरुस्तारः सपिता प्रपि-

तामहः ॥ यज्ञो यज्ञपतिर्यज्वा यज्ञांगो
यज्ञवाहनः ॥ ४ ॥ यज्ञभृद्यज्ञकृद्यज्ञी
यज्ञभुग्यज्ञसाधनः ॥ यज्ञांतकृद्यज्ञ
गुह्यमन्नमन्नाद एव च ॥ ५ ॥ आत्मयो
निः स्वयंजातो वैखानः सामगायनः
॥ देवकीनंदनः स्रष्टा क्षितीशः पाप
नाशनः ॥ ६ ॥ शंखभृन्नंदकी चक्री-

वि॰ शार्ङ्गधन्वा गदाधरः ॥ रथांगपाणिर स॰
२६ क्षोभ्यः सर्वप्रहरणायुधः ॥१०७॥ स
र्वप्रहरणायुधोंनम इति ॥ ॥ इतीदं
कीर्त्तनीयस्य केशवस्य महात्मनः ॥
नाम्नां सहस्रं दिव्यानामशेषेण प्रकी
र्त्तितम् ॥८॥ यइदं शृणुयान्नित्यं य २६
श्चापि परिकीर्त्तयेत् ॥ नाशुभं प्राप्नु

यात्किंचित्सोऽमुत्रेहचमानवः॥९
॥वेदांतगोब्राम्हणःस्यात्क्षत्रियोवि
जयीभवेत्॥वैश्योधनसमृद्धःस्या
च्छूद्रःसुखमवाप्नुयात्॥१०॥धर्मा
र्थीप्राप्नुयाद्धर्ममर्थार्थीचार्थमाप्नु
यात्॥कामानवाप्नुयात्कामीप्रजा
र्थीप्राप्नुयात्प्रजाः॥११॥भक्तिमान्यः

वि० सदोत्थायशुचिस्तद्गतमानसः ॥ सह्य स०
२७ स्रंवासुदेवस्य नाम्नामेतत्प्रकीर्तयेत्
॥१२॥ यशःप्राप्नोति विपुलंज्ञातिप्रा
धान्यमेव च ॥ अचलां श्रियमाप्नोति
श्रेयःप्राप्नोत्यनुत्तमम् ॥१३॥ नभयं
क्वचिदाप्नोति वीर्यंतेजश्च विंदति ॥ २७
भवत्यरोगोद्युतिमान्बलरूपगुणा

न्वितः ॥१४॥ रोगार्त्तो मुच्यते रोगाद्ब
द्धो मुच्येत बंधनात् ॥ भयान्मुच्येत भी
तस्तु मुच्येतापन्न आपदः ॥१५॥ दु
र्गाण्यतितरत्याशु पुरुषः पुरुषोत्त
मम् ॥ स्तुवन्नामसहस्रेण नित्यं भ
क्तिसमन्वितः ॥१६॥ वासुदेवाश्रयो
मर्त्यो वासुदेवपरायणः ॥ सर्वपाप

वि. विशुद्धात्मा याति ब्रह्म सनातनं ॥१७ स.
२८ ॥नवासुदेवभक्तानामशुभं विद्यते क
चित्॥जन्ममृत्युजराव्याधिभयं नै न
वोपजायते ॥१८॥ इमं स्तवमधीया
नः श्रद्धाभक्तिसमन्वितः॥युज्येता
त्मासुखक्षांतिश्रीधृतिस्मृतिकीर्ति २८
भिः॥१९॥नक्रोधो नच मात्सर्यं न

लोभोनाशुभामतिः ॥ भवंतिकृतपुण्या
नांभक्तानांपुरुषोत्तमे ॥१२०॥ द्यौस्स
चंद्रार्कनक्षत्रारवंदिशोभूर्महोदधिः ॥
वासुदेवस्य वीर्येण विधृतानिमहात्म
नः ॥२१॥ ससुरासुरगंधर्वं सयक्षोरग
राक्षसं॥ जगद्वशेवर्ततेदं कृष्णस्यसचरा
चरं॥२२॥ इंद्रियाणि मनोबुद्धिःसत्वं

तेजोबलंधृतिः ॥ वासुदेवात्मकान्याहुः
क्षेत्रंक्षेत्रज्ञएवच ॥२३॥ सर्वागमाना
माचारःप्रथमंपरिकल्पते ॥ आचार
प्रभवोधर्मोधर्मस्यप्रभुरच्युतः ॥२४
॥ ऋषयःपितरोदेवा महाभूतानि
धातवः ॥ जंगमाजंगमंचेदं जगन्ना
रायणोद्भवम् ॥२५॥ योगोज्ञानं त-

थासांख्यं विद्याःशिल्पादिकर्मच॥ वे
दाःशास्त्राणि विज्ञानमेतत्सर्वंजनार्द
नात्॥२६॥एकोविष्णुर्महद्भूतं पृथ
ग्भूतान्यनेकशः॥त्रीन्लोकान्व्याप्य
भूतात्मा भुंक्ते विश्वभुगव्ययः॥२७
इमंस्तवं भगवतो विष्णोर्व्यासेनकी
र्तितं॥पठेद्यइच्छेत्पुरुषःश्रेयःप्रा-

वि· सुंसुखानिच॥२८॥विश्वेश्वरमजंदेवं स·
३० जगतःप्रभवाप्ययम्॥भजंतियेपुष्क
राक्षंनतेयांतिपराभवम्॥२९॥ ॥
अर्जुनउवाच॥ ॥पद्मपत्रविशालाक्ष
पद्मनाभसुरोत्तम॥भक्तानामनुरक्ता
नांत्राताभवजनार्दन॥१३०॥श्रीभग ३०
वानुवाच॥योमांनामसहस्रेणस्तोतु

मिच्छतिपांडव॥ सोहमेकेन श्लोकेन
स्तुत एव न संशयः॥३१॥ नमोस्त्वनं
ताय सहस्रमूर्तये सहस्रपादाक्षि
शिरोरुबाहवे॥ सहस्रनाम्ने पुरुषा
य शाश्वते सहस्रकोटीयुगधारिणे
नमः॥३२॥ नमः कमलनाभाय नम
स्तेजलशायिने॥ नमस्ते केशवानं

तवासुदेवनमोस्तुते ॥ ३३ ॥ वासना
द्वासुदेवस्य वासितं भुवनत्रयं ॥ सर्व
भूतनिवासोसि वासुदेव नमोस्तुते
॥ ३४ ॥ नमो ब्रह्मण्यदेवाय गोब्राह्म
णहिताय च ॥ जगद्धिताय कृष्णाय
गोविंदाय नमोनमः ॥ ३५ ॥ आकाशा
त्पतितं तोयं यथा गच्छति सागरम्

॥ सर्वदेव नमस्कारः केशवं प्रतिगच्छ
ति ॥ ३६ ॥ एष निष्कंटकः पंथा यत्रसं
पूज्यतेहरिः ॥ कुपथं तं विजानीयाद्गो
विंदरहितागमं ॥ ३७ ॥ सर्ववेदेषु यत्पु
ण्यं सर्वतीर्थेषु यत्फलम् ॥ तत्फलं सम
वाप्नोति स्तुत्वा देवं जनार्दनम् ॥ ३८ ॥
योनरः पठते नित्यं त्रिकालं केशवाल

ये ॥ द्विकालमेककालं वा क्रूरं सर्वं व्यपो
हति ॥ ३९ ॥ दह्यंते रिपवस्तस्य सौम्याः
सर्वे सदा ग्रहाः ॥ विलीयंते च पापानि
स्तवे ह्यस्मिन् प्रकीर्त्तिते ॥ १४० ॥ ये
न ध्यातः श्रुतो येन येनायं पठितः स्त
वः ॥ दत्तानि सर्वदानानि स्कराः सर्वे
समर्चिताः ॥ ४१ ॥ इह लोके परे वा

पि न भयं विद्यते क्वचित् ॥ नाम्नां स
हस्रं योऽधीते द्वादश्यां मम सन्निधौ
॥ ४२ ॥ स निर्दहति पापानि कल्पको
टिशतानि च ॥ अश्वत्थसन्निधौ पा
र्थ कृत्वा मनसि केशवम् ॥ ४३ ॥ प
ठेन्नामसहस्रं तु गवां कोटिफलं ल
भेत् ॥ शिवालये पठेन्नित्यं तुलसी

वि० वनसंस्थितः ॥४४॥ नरो मुक्तिमवा स०
३३ मोति चक्रपाणेर्वचो यथा ॥ ब्रह्मह-
त्यादिकं पापं सर्वं सद्यो विनश्यति
॥४५॥ ॥ इतिश्रीमन्महाभारते शतसहस्र
संहितायां वैयासिक्यां आनुशासनिके पर्वणि
दानधर्मे भीष्मयुधिष्ठिरसंवादे श्रीविष्णोर्दिव्य
सहस्रनामस्तोत्रं समाप्तम् ॥ ६ ६

इतिविष्णुसहस्रनामस०

अथभीष्मस्तवराजप्रा०



श्रीगणेशायनमः॥ ॥जनमेजयउ-
वाच॥ ॥शरतल्पेशयानस्तु भारता
नां पितामहः॥कथमुत्सृष्टवान्देहं कं
चयोगमधारयत्॥१॥ वैशंपायनउ
वाच॥ ॥शृणुष्वावहितो राजन् शुचि
र्भूत्वासमाहितः॥भीष्मस्य कुरुशा
र्दूल देहोत्सर्गं महात्मनः॥२॥नि वृत्त

भी॰ मात्रेत्वयने उत्तरे वै दिवाकरे ॥ समावे स्त॰
१ शयदात्मानमात्मन्येवसमाहितः ॥ ३
शुक्लपक्षस्य चाष्टम्यां माघमासस्य
पार्थिव ॥ प्राजापत्ये च नक्षत्रे मध्ये प्रा
से दिवाकरे ॥ ४ ॥ विकीर्णांशुरिवादि
त्यो भीष्मः शरशतैश्चितः ॥ शुशुभे १
परया लक्ष्म्या वृतो ब्राह्मणसत्तमैः

॥५॥ व्यासेन वेदविदुषा नारदेन सु
रर्षिणा ॥ देवरातेन वात्स्येन तथा
तेन सुमंतुना ॥६॥ तथा जैमिनि
नाचैव पैलेन च महात्मना ॥ शांडि
ल्यदेवलाभ्यां च मैत्रेयेण च धीम
ता ॥७॥ असितेन वसिष्ठेन कौशि
केन महात्मना ॥ हारीतरोमशाभ्यां

च तथाग्नेयेण धीमता ॥ ८ ॥ बृहस्प
तिश्च शुक्रश्च च्यवनश्च महामुनिः ॥
सनत्कुमारकपिलौ वाल्मीकिस्तुंबु
रुः कुरुः ॥ ९ ॥ मौद्गल्यो भार्गवोराम
स्तृणबिंदुर्महामुनिः ॥ पिप्पलाद
श्चवायुश्च संवर्त्तः पुलहः कचः ॥ १० ॥
कश्यपश्च पुलस्त्यश्च क्रतुर्दक्षः परा

श्वरः ॥ मरीचिरंगिराः कण्वो गोतमो
गालवो मुनिः ॥११॥ धौम्यो विभांडो
मांडव्यो धौम्रः कृष्णोनुभौतिकः ॥ उ
लूकः परमो विप्रो मार्कंडेयो महामु-
निः ॥१२॥ भास्करः पूरणः कृष्णः सू
तः परमधार्मिकः ॥ शैब्येन याज्ञव-
ल्क्येन शंखेन लिखितेन च ॥१३॥ ए

भी तैश्चान्यैर्मुनिगणैर्महाभागैर्महात्म- स्त-
३ भिः॥ श्रद्धादमपुरस्कारैर्वृतश्चंद्र इव
ग्रहैः॥१४॥ भीष्मस्तु पुरुषव्याघ्रकर्म
णा मनसा गिरा ॥शरतल्पगतः कृ-
ष्णं प्रदध्यौ प्रांजलिः शुचिः॥१५॥स्व
रेण हृष्टपुष्टेन तुष्टाव मधुसूदनम्॥ ३.
योगेश्वरं पद्मनाभं विष्णुं जिष्णुं जग

त्सभुम् ॥१६॥ कृतांजलिः शुचिर्भूत्वा
वाग्विदां प्रवरः प्रभुः ॥ भीष्मः परमध
र्मात्मा वासुदेवमथास्तुवत् ॥१७॥
भीष्म उवाच ॥ ॥ आरिराधयिषुः
कृष्णं वाचं जिगदिषाम्यहम् ॥ तया
व्याससमासिन्या प्रीयतां पुरुषोत्त
मः ॥१८॥ शुचिं शुचिपदं हंसं तत्पदं

भी० परमेष्ठिनम्॥ मुक्त्वा सर्वात्मनात्मानं तं स्त०
४ प्रपद्ये प्रजापतिम्॥ १९॥ अनाद्यं तत्परं ब्र
ह्म न देवा नर्षयो विदुः॥ एकोयं भगवान्दे
वो धाता नारायणो हरिः॥ २०॥ नाराय
णादृषिगणास्तथा सिद्धमहोरगाः॥ दे
वा देवर्षयश्चैव तं विदुः परमव्ययम्॥ २१
॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः

॥ यं नजानंतिकोह्येष कुतोवा भगवा
निति ॥ २२ ॥ यस्मिन्विश्वानि भूतानि
तिष्ठंतिच विशंतिच ॥ गुणभूतानि भू
तेशे सूत्रे मणिगणाइव ॥ २३ ॥ यस्मि
न्नित्ये तते तंतौ दृढे स्रगिव तिष्ठति ॥ स
दसद्ग्रथितं विश्वं विश्वगे विश्वकर्मणि
॥ २४ ॥ हरिं सहस्रशिरसं सहस्रचर

णेक्षणम् ॥ सहस्रबाहुमुकुटं सहस्रव
दनोज्ज्वलम् ॥ २५ ॥ प्राहुर्नारायणं देवं
यं विश्वस्य परायणम् ॥ अणीयसाम
णीयांसं स्थविष्ठं च स्थवीयसाम् ॥ २६
॥ गरीयसां गरिष्ठं च श्रेष्ठं च श्रेयसामपि
॥ यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु
च ॥ २७ ॥ गृणंति सर्वकर्माणं सत्यं स

त्येषु सामसु ॥ चतुर्भिश्चतुरात्मानं सत्व

स्थं सात्वतां पतिम् ॥ २८ ॥ यं दिव्यैर्देवम

र्चंति गुह्यैः परमनामभिः ॥ यस्मिन्नित्यं

तपस्तप्तं यदंगेष्वनुतिष्ठति ॥ २९ ॥ सर्वा

त्मा सर्ववित् सर्वः सर्वगः सर्वभावनः ॥

यं देवं देवकी देवी वसुदेवादजीजनत् ॥

॥ ३० ॥ भौमस्य ब्रह्मणो गुप्त्यै दीप्तम

भी० ६

ग्निमिवारणिः ॥ यमनन्यो व्यपेताशीरा
त्मानं वीतकल्मषम् ॥ ३१ ॥ इष्ट्वाऽनं
त्याय गोविंदं पश्यत्यात्मानमात्मनि
॥ अतिवाय्विंद्रकर्माणमतिसूर्याग्नि
तेजसम् ॥ ३२ ॥ अतिबुद्धींद्रियात्मानं
तं प्रपद्ये प्रजापतिम् ॥ पुराणे पुरुषं प्रो
क्तं ब्रह्म प्रोक्तं युगादिषु ॥ ३३ ॥ क्षये सं

स्त० ६

कर्षिणं प्रोक्तं तमुपास्य मुपास्महे ॥ य
मेकं बहुधात्मानं प्रादुर्भूत मधोक्षजम्
॥३४॥ नान्यभक्ताः क्रियावंतो यजंते
सर्वकामदम् ॥ यं प्राहुर्जगतः कोशं य
स्मिन्सन्निहिताः प्रजाः ॥३५॥ य
स्मिन्लोकाः स्फुरंतीमे जले शकुनयो
यथा ॥ ऋतमेकाक्षरं ब्रह्म यत्तत्सद

भी सतःपरम् ॥३६॥ अनादिमध्यपर्यंतं स्त
७ नदेवानर्षयो विदुः ॥ यं सुरासुरगंधर्वाः
ससिद्धर्षिमहोरगाः ॥३७॥ प्रयता
नित्यमर्चंति परमं दुःखभेषजम् ॥अ
नादिनिधनं देवमात्मयोनिं सनातनं
॥३८॥ अप्रतर्क्यमविज्ञेयं हरिंनारा ७
यणं प्रभुम् ॥ यं वै विश्वस्य कर्तारं ज

गतस्तस्थुषां पतिम् ॥३९॥ वदंतिजग
तोध्यक्षमक्षरं परमं पदम् ॥ हिरण्यव
र्णोयोगर्भो दितेर्दैत्यनिषूदनः ॥४०॥
एको द्वादशधा जज्ञे तस्मै सूर्यात्मने न
मः॥४१॥शुक्ले देवान्पितॄन्कृष्णे तर्प
यत्यमृतेनयः॥यश्चराजा द्विजातीनां
तस्मै सोमात्मनेनमः॥४२॥महतस्त

मसः पारे पुरुषं ह्यतितेजसम् ॥ यं ज्ञा
त्वा मृत्युमत्येति तस्मै ज्ञेयात्मने नमः
॥४३॥ यं बृहंतं बृहत्युक्थं यमिनो यं म
हाध्वरे ॥ यं विप्रसंघा गायंति तस्मै वे
दात्मने नमः ॥४४॥ ऋग्यजुःसामाथ
र्वाणं दशार्द्धं हविरात्मकम् ॥ यं सप्त
तंतुं तन्वंति तस्मै यज्ञात्मने नमः ॥४५

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव
च॥हूयते च पुनर्द्वाभ्यां तस्मै होमात्म
नेनमः॥४६॥यः सुपर्णो यजुर्नाम छं
दोगात्रस्त्रिवृच्छिराः॥रथंतरं बृहत्साम
तस्मैस्तोत्रात्मनेनमः॥४७॥यः सहस्र
समे सत्रे यज्ञो विश्वसृजामृषिः॥हिरण्य
पक्षः शकुनिस्तस्मै हंसात्मनेनमः॥४८

पदांगसंधिपर्वाणंस्वरव्यंजनभूषण
म्॥यमाहुश्चाक्षरं नित्यं तस्मैवागा-
त्मनेनमः॥४९॥यज्ञांगो योवराहोवै भू
त्वा गामुज्जहार ह॥लोकत्रयहितार्था
य तस्मैवीर्यात्मनेनमः॥५०॥यः शेते
योगमास्थाय पर्यंकेनागभूषिते॥
फणासहस्त्ररचिते तस्मै निद्रात्मने न

मः॥५१॥ यश्चिनोतिसतां सेतुमृतेनामृतयोनिना॥ धर्मार्थव्यवहारार्थं तस्मै सत्यात्मने नमः॥५२॥ यंपृथग्धर्मचरणाः पृथग्धर्मफलैषिणः॥ पृथग्धर्मैः समर्चंति तस्मै धर्मात्मने नमः॥५३॥ यतः सर्वे प्रसूयंते ह्यनंगात्मांगदेहिनः॥ उन्मादः सर्वभूतानां तस्मै कामात्मने

भी. नमः॥५४॥यंव्यक्तिस्थितमव्यक्तंवि स्त.
१० चिन्वंतिमहर्षयः॥क्षेत्रेक्षेत्रज्ञमासी
नंतस्मैक्षेत्रात्मनेनमः॥५५॥यंत्रिधा
त्मानमात्मस्थंवृतंषोडशभिर्गुणैः॥
प्राहुःसप्तदशंसांख्यास्तस्मैसांख्या
त्मनेनमः॥५६॥यंविनिद्राजितश्वासाः १०
शांतादांताजितेंद्रियाः॥ज्योतिःपश्यं

तियुंजानास्तस्मै योगात्मने नमः॥५७
॥अपुण्यपुण्योपरमे यं पुनर्भवनिर्भ
याः॥शांताःसंन्यासिनो यांति तस्मै
मोक्षात्मने नमः॥५८॥योसौ युगसह
स्रांते प्रदीप्तार्चिर्विभावसुः॥संक्षोभ
यतिभूतानि तस्मै घोरात्मने नमः॥५९
॥संभक्ष्य सर्वभूतानि कृत्वा चैकार्णवं

जगत् ॥ बालः स्वपिति यश्चैकस्तस्मै
मायात्मने नमः ॥ ६० ॥ अजस्य नाभौ
संभूतं यस्मिन्विश्वं प्रतिष्ठितम् ॥ पु-
ष्करं पुष्कराक्षस्य तस्मै पद्मात्मने न
मः ॥ ६१ ॥ सहस्रशिरसे चैव पुरुषाया
मितात्मने ॥ चतुःसमुद्रपर्यंके योगनि
द्रात्मने नमः ॥ ६२ ॥ यस्य केशेषु जीमू

ता नद्यः सर्वांगसंधिषु ॥ कुक्षौ समुद्रा

श्चत्वारस्तस्मै तोयात्मने नमः ॥ ६३ ॥

यस्मात्सर्वाः प्रसूयंते सर्गप्रलयवि

क्रियाः ॥ यस्मिंश्चैव प्रलीयंते तस्मै हे

त्वात्मने नमः ॥ ६४ ॥ यो निषण्णो भवे

द्रात्रौ दिवा भवति धिष्ठितः ॥ इष्टानिष्ट

स्य च द्रष्टा तस्मै द्रष्ट्रात्मने नमः ॥ ६५ ॥

भी॰ अकुंठं सर्वकार्येषु धर्मकार्यार्थमुद्यत स्त॰
१२ म् ॥ वैकुंठस्य हि तद्रूपं तस्मै कार्यात्म
नेनमः ॥ ६६ ॥ विभज्य पंचधात्मानं
वायुभूतः शरीरगः ॥ यश्चेष्टयति भू
तानि तस्मै वाय्वात्मनेनमः ॥ ६७ ॥
ब्रह्मवक्त्रं भुजौ क्षत्रं कृत्स्नमूरूदरं वि १२
शः ॥ पादौ यस्याश्रिताः शूद्रास्तस्मै

वर्णात्मनेनमः ॥ ६८ ॥ युगेष्वावर्तते
योगैर्मासर्त्वयनहायनैः ॥ सर्गप्रल
ययोः कर्त्ता तस्मैकालात्मनेनमः
॥ ६९ ॥ यस्याग्निरास्यं द्यौर्मूर्धा खं
नाभिश्चरणौक्षितिः ॥ सूर्यश्चक्षुर्दिशः
श्रोत्रे तस्मैलोकात्मनेनमः ॥ ७० ॥ प
रः कालात्परो यज्ञात्परात्परतरोहियः

भी. ॥अनादिरादिर्विश्वस्य तस्मै विश्वा स्त.
१३ त्मने नमः॥७१॥ विषये वर्तमानोयं तं
वैशेषिक निर्गुणैः॥ प्राहुर्विषयगोप्ता
रं तस्मै गोप्त्रात्मने नमः॥७२॥ अन्न
पानेंधनमयो रसप्राणविवर्द्धनः॥ यो
धारयति भूतानि तस्मै प्राणात्मने न १३
मः॥७३॥ पिंगेक्षणसटं यस्य रूपं दं

ष्टानखायुधम् ॥ दानवेंद्रांतकरणंत-
स्मै ह्मात्मनेनमः ॥ ७४ ॥ रसातलगतः
श्रीमाननंतो भगवान्विभुः ॥ जगद्धार
यते कृत्स्नं तस्मै वीर्यात्मनेनमः ॥ ७५
॥ यो मोहयति भूतानि स्नेहपाशानु
बंधनैः ॥ सर्गस्य रक्षणार्थाय तस्मै
मोहात्मनेनमः ॥ ७६ ॥ भूतलातलम

भी॰ ध्यस्थो हत्वा तु मधुकैटभौ ॥ उद्धृताये स्त॰
१४ न वै वेदास्तस्मै मत्स्यात्मने नमः ॥ ७७
॥ ससागरनगां बिभ्रत्सप्तद्वीपां वसुंध
राम् ॥ यो धारयति पृष्ठेन तस्मै कूर्मा
त्मने नमः ॥ ७८ ॥ एकार्णवे हि मग्नां
तां वाराहं रूपमास्थितः ॥ उद्दधार १४
महीं योसौ तस्मै क्रोडात्मने नमः ॥

॥७९॥ नारसिंहं वपुः कृत्वा यस्त्रैलो-
क्यभयंकरः॥ हिरण्यकशिपुं जघ्ने त
स्मै सिंहात्मने नमः॥८०॥ वामनं रूप
मास्थाय बलिं संयम्य मायया॥ इ
मे क्रांतास्त्रयो लोकास्तस्मै क्रांतात्म
ने नमः॥८१॥ जमदग्निसुतो भूत्वा
रामः परशुधृक्प्रभुः॥ सहस्रार्जुनंह

त्वान् तस्मै उग्रात्मने नमः ॥८२॥ रा
मो दाशरथिर्भूत्वा पौलस्त्यकुलनंद
नम् ॥ जघान रावणं संख्ये तस्मै क्ष
त्रात्मने नमः ॥८३॥ वसुदेवसुतः श्री
मान् वासुदेवो जगत्पतिः ॥ जहार व
सुधाभारं तस्मै कृष्णात्मने नमः ॥८४
॥ बुद्धरूपं समास्थाय सर्वरूपपरा

यण:॥ मोहयन् सर्वभूतानि तस्मै मो
हात्मने नमः॥ ८५॥ हनिष्यति कलेरं
ते म्लेच्छांस्तुरगवाहनः॥ धर्मसंस्था
पनार्थाय तस्मै कल्क्यात्मने नमः॥
॥ ८६॥ आत्मज्ञानमिदं ज्ञानं ज्ञात्वा पं
चस्ववस्थितः॥ यं ज्ञानेनाधिगच्छंति
तस्मै ज्ञानात्मने नमः॥ ८७॥ अप्रमे

यशरीराय सर्वतोबुद्धिचक्षुषे ॥ अपा
रापरिमेयाय तस्मै दिव्यात्मने नमः
॥८८॥ जटिने दंडिने नित्यं लंबोदरश
रीरिणे ॥ कमंडलुनिषंगाय तस्मै ब्रह्मा
त्मने नमः ॥८९॥ शूलिने त्रिदशेशाय
त्र्यंबकाय महात्मने ॥ भस्मदिग्धो-
र्ध्वलिंगाय तस्मै रुद्रात्मने नमः ॥९०

चंद्रार्धकृतशीर्षाय व्यालयज्ञोपवी
तिने ॥ पिनाकशूलहस्ताय तस्मै उग्रा
त्मने नमः ॥९१॥ पंचभूतात्मभूताय
भूतादिनिधनायच ॥ अक्रोधद्रोह
मोहाय तस्मै शांतात्मने नमः ॥९२॥
यस्मिन्सर्वे यतः सर्वे यः सर्वे सर्वतश्च
यः ॥ यश्च सर्वमयो देवस्तस्मै सर्वा

भी त्मनेनमः॥९३॥विश्वकर्मन्नमस्ते स्त·
१७ स्तु विश्वात्मा विश्वसंभवः॥अपव-
र्गस्थ भूतानां पंचानां परतः स्थितः
॥९४॥नमस्ते त्रिषु लोकेषु नमस्ते पर
तस्त्रिषु॥नमस्ते त्रिषु सर्वेषु त्वं हि स
र्वमयो निधिः॥९५॥नमस्ते भगवन् १७
विष्णो लोकानां प्रभवाप्ययः॥त्वं हि

कर्ता हृषीकेशः संहर्ता चापराजितः १६
॥ तेन पश्यामि भगवन् दिव्येषु त्रिषुव
र्त्मसु ॥ तच्च पश्यामि तत्वेन यत्ते रूपं
सनातनम् ॥ १७ ॥ दिवं ते शिरसा व्या
प्तं पद्भ्यां देवी वसुंधरा ॥ विक्रमेण त्र
यो लोकाः पुरुषोऽसि सनातनः ॥ १८
॥ दिशो भुजा रविश्चक्षुर्वीर्यं शुक्रः प्र

जापतिः ॥ सप्तमार्गो निरुद्धास्ते वायो स्त॰
रमिततेजसः ॥ ९९ ॥ अतसीपुष्पसं
काशं पीतकौशेयवाससम् ॥ नम-
स्यंति च गोविंदं न तेषां विद्यते भयम्
॥ १०० ॥ नमो नरकसंत्रासरक्षामंड
लकारिणे ॥ संसारनिम्नगावर्त्ततरि १८
काष्ठाय विष्णवे ॥ १०१ ॥ नमो ब्रह्म

ण्यदेवाय गोब्राह्मणहिताय च ॥ ज
गद्धिताय कृष्णाय गोविंदाय नमो
नमः ॥ २ ॥ प्राणकांतारपाथेयं संसा
रच्छेदभेषजम् ॥ दुःखशोकपरित्रा-
णं हरिरित्यक्षरद्वयम् ॥ ३ ॥ यथा वि
ष्णुमयं सत्यं यथा विष्णुमयं जगत्
॥ यथा विष्णुमयं सर्वं पाप्मा मे नाश

श्री॰ नं तथा ॥ ४ ॥ त्वां प्रपन्नाय भक्ताय स्त
१९ गतिमिष्टां जिगीषवे ॥ यच्छ्रेयः पुंड
रीकाक्ष तद्ध्यायस्व सुरेश्वर ॥ ५ ॥ इ
ति विद्यातपोयोनिरयोनिर्विष्णुरी
डितः ॥ वाग्यज्ञेनार्चितो देवः प्रीयतां
मे जनार्दनः ॥ ६ ॥ नारायणपरं ब्रह्म १९
नारायणपरं तपः ॥ नारायणपरं चेदं

सर्वं नारायणात्मकम् ॥७॥ ॥वैशं
पायनउवाच॥ ॥एतावदुक्त्वावचनं
भीष्मस्त्वाहृतमानसः॥नमइत्येव
कृष्णाय प्रणाममकरोत्तदा॥८॥अ
भिगम्य तु योगेन भक्तिं भीष्मस्य मा
धवः॥त्रैलोक्यदर्शनज्ञानं दिव्यंदत्वा
ययौहरिः॥९॥तस्मिन्नुपरतेशब्दे ता

तस्ते ब्रह्मवादिनः ॥ भीष्मं वाग्भिर्बा
ष्पकंठास्तमानर्चुर्महामतिम् ॥१०॥
तेस्तुवंतश्च विप्राग्र्याः केशवं पुरुषो
त्तमम् ॥ भीष्मं च शनकैः सर्वे प्रशशं
सुः पुनः पुनः ॥११॥ यं योगिनः प्राण
विमोक्षकाले यत्नेन चित्ते विनिवेश
यंति ॥ साक्षात्पुरस्ताद्धरिमीक्षमा

णः प्राणानजहो मासकालो हि भीष्मः॥१२॥ शुक्लपक्षे दिवा भूमौ गंगायां चोत्तरायणे॥ धन्यास्तात मरिष्यंति हृदयस्थे जनार्दने॥१३॥ विदित्वा भक्तियोगं तु भीष्मस्य पुरुषोत्तमः॥ सहसोत्थाय संतुष्टो यानमेवान्वपद्यत॥१४॥ केशवः सात्यकिश्चैव रथेने-

भी. केनजग्मतुः॥अपरेणमहात्मानौयु स्त.
२१ धिष्ठिरधनंजयौ॥१५॥भीमसेनोय
मौचोभौरथमेकंसमास्थिताः॥कृ
पोयुयुत्सुःसूतश्चसंजयश्चापरंरथ
म्॥१६॥तेरथैर्नगराकारैःप्रयाताः
पुरुषर्षभाः॥नेमिघोषेणमहताकंप २१
यंतोवसुंधराम्॥१७॥ततोगिरःपु


रुषवरस्तवान्विता द्विजेरिताः पथि
सुमनाः सशुश्रुवे ॥ कृतांजलिं प्रणत
मथापरं जनं स केशिहा मुदितमना
भ्यनंदत ॥१८॥ अनादिनिधनं वि
ष्णुं सर्वलोकमहेश्वरं ॥ धर्माध्यक्षं
स्तुवन्नित्यं सर्वपापैः प्रमुच्यते ॥१९॥
इमं स्तवं यः पठति शार्ङ्गधन्वनः शृ

श्री॰ णोतिवा भक्तिसमन्वितो जनः ॥ स स्त॰
२२ चक्रधृक् प्रतिहतसर्वकल्मषो जनार्द
नं प्रविशति देहसंक्षये ॥२०॥ अशानि
शितसुधारं यस्य चक्रं सुचारु मणिक
नकविचित्रे कुंडले यस्य कर्णौ ॥ भ्रमर
शतसहस्रैः सेविता यस्य माला असु २२
रकुलनिहंता प्रीयतां वासुदेवः ॥२१॥

स्तवराजः समाप्तोयं विष्णोरद्भुतक-
र्मणः॥ गांगेयेन पुरा गीतो महापात
कनाशनः॥२२॥ श्रीभगवानुवाच॥
यः संपठेदिदं स्तोत्रं ममजन्मानुकीर्त्त
नम्॥ देवलोकमतिक्रम्य तस्य लोको
यथा मम॥२३॥ इतिश्रीमन्महाभारतेशतसाहस्र्यां
सं० वै० शांतिप० भीष्मयुधिष्ठिरसंवादे भीष्मस्तवराजः समाप्त॥

इतिभीष्मस्तव०स०

अथ अनुस्मृतिप्रारंभः



श्रीगणेशायनमः॥ ॥शतानीकउ
वाच॥ ॥महामतेमहाप्राज्ञसर्व-
शास्त्रविशारद॥अक्षीणकर्मबंध
स्तुपुरुषोद्विजसत्तम॥१॥सततंकिं
जपेज्जाप्यंविबुधःकिमनुस्मरन्॥
मरणेयज्जपेज्जाप्यंयंचभावमनु
स्मरन्॥२॥यत्त्वध्यात्वाद्विजश्रेष्ठ

अ॰ पुरुषोमृत्युमागतः॥परंपदमवाप्नो स्मृ॰
१ तितन्मेवदमहामुने॥३॥शौनकउवा
च॥ ॥इदमेवमहाप्राज्ञपृष्टवांश्च
पितामहम्॥भीष्मंधर्मभृतांश्रेष्ठंध
र्मपुत्रोयुधिष्ठिरः॥४॥युधिष्ठिरउवा
च॥ ॥पितामहमहाप्राज्ञसर्वशा १
स्त्रविशारद॥प्रयाणकालेकिंचिं

त्यं मुमुक्षोस्तत्त्वचिंतके: ॥५॥ कि
न्नुस्मरन्कुरुश्रेष्ठ मरणे पर्युपस्थि
ते॥ प्राप्नुयां परमां सिद्धिं श्रोतुमि-
च्छामि तत्त्वत: ॥६॥ भीष्म उवाच
॥ तद्युक्तंस्वहितं सूक्ष्मं प्रश्नमुक्तंत्व
यानघ॥ शृणुष्वावहितो राजन्नार
देन पुराश्रुतम्॥७॥ श्रीवत्सांकंजग

अ० बीजमनंतंलोकसाक्षिणम् ॥ पुराना स्मृ०
२ रायणंदेवंनारदःपरिपृष्टवान् ॥ ८ ॥
नारदउवाच ॥ त्वमक्षरं परंब्रह्म निर्गु
णं तमसः परम् ॥ आहुर्वेद्यं परंधाम
ब्रह्माणं कमलोद्भवम् ॥ ९ ॥ भगवन्
भूतभव्येश श्रद्दधानैर्जितेंद्रियैः ॥ क २
थं भक्तैर्विचिंत्योऽसि योगिभिर्मो

क्षकांक्षिभिः॥१०॥किन्नुजाप्यंजपे
न्नित्यंकल्पमुत्थायमानवः॥कथं
जपेत्सदाध्यायेब्रूहितत्त्वंसनातन
म्॥११॥ ॥श्रीभीष्मउवाच॥ ॥श्रु
त्वाचदेवदेवर्षेर्वाक्यंवाक्यविशार
दः॥प्रोवाचभगवान्विष्णुर्नारदाय
च्चधीमते॥१२॥श्रीभगवानुवाच॥

अ॰ हंततेकथयिष्यामि इमांदिव्यामनु स्त
२ स्मृतिम् ॥ मरणे मामनुस्मृत्य प्राप्नो
ति परमांगतिम् ॥१३॥ यामधीत्य प्र
याणेतु मद्भावायोपपद्यते ॥ ओंका
रमग्रतः कृत्वा मांनमस्कृत्य नारद ॥
॥१४॥ एकाग्रः प्रयतोभूत्वाइमंमंत्र ३
मुदीरयेत् ॥ ओंनमो भगवते वासुदे

वायइत्ययमू ॥१५॥ अवशेनापि
यन्नाम्नि कीर्त्तितेसर्वपातकैः ॥ पु
मान्विमुच्यतेसद्यः सिंहत्रस्तैर्मृगै
रिव ॥१६॥ क्षराक्षरविसृष्टस्तु शो
च्यते पुरुषोत्तमः ॥ अव्यक्तंशाश्व
तंदेवप्रभवं पुरुषोत्तमम् ॥१७॥ प्र
पद्ये पुंडरीकाक्षं देवंनारायणंहरि

म् ॥ लोकनाथं सहस्राक्ष मक्षरं पर
मं पदम् ॥१८॥ भगवंतं प्रपन्नोऽस्मि
भूतभव्यभवत्प्रभुम् ॥ स्रष्टारं सर्व
लोकानामनंतं विश्वतोमुखम् ॥१९
॥ पद्मनाभं हृषीकेशं प्रपद्ये सत्यम
च्युतम् ॥ हिरण्यगर्भममृतं भूगर्भं
तमसः परम् ॥२०॥ प्रभोः प्रभुमना

ध्यं च प्रपद्ये तं रविप्रभम् ॥ सहस्रशी
र्षकं देवं महर्षेः सत्वभावनम् ॥ २१ ॥
प्रपद्ये सूक्ष्ममचलं वरेण्यमनघं शु
चिम् ॥ नारायणं पुराणेशं योगावा
सं सनातनम् ॥ २२ ॥ संयोगं सर्वभू
तानां प्रपद्ये शिवमीश्वरम् ॥ यः पुरा
प्रलये प्राप्ते नष्टे स्थावरजंगमे ॥ २३

अ॰ ब्रह्मादिषु प्रलीनेषु नष्टे लोके चराचरे स्मृ॰
५ ॥ एकस्तिष्ठति विश्वात्मा स मे विष्णुः
प्रसीदतु ॥ २४ ॥ यः प्रभुः सर्वलोका
नां येन सर्वमिदं ततम् ॥ चराचरगुरु
र्देवः स मे विष्णुः प्रसीदतु ॥ २५ ॥ आ
भूतसंप्लवे चैव प्रलीने प्रकृतौ महान् ५
॥ योवतिष्ठति विश्वात्मा स मे वि-

ष्णुःप्रसीदतु ॥२६॥ येनक्रांतास्त्रयो
लोकादानवाश्चवशीकृताः॥शरण्यः
सर्वलोकानांसमेविष्णुःप्रसीदतु॥
॥२७॥ यस्यहस्तेगदाचक्रंगरुडो
यस्यवाहनम्॥ शंखःकरतलेयस्य
समेविष्णुःप्रसीदतु॥२८॥कार्यंक्रि
याचकरणंकर्त्ताहेतुःप्रयोजनम्॥अ

अ. क्रियाकरणंकार्यंसमेविष्णुःप्रसी स्तृ
६ दतु॥२९॥चतुर्भिश्चचतुर्भिश्चद्वाभ्यां
पंचभिरेवच॥हूयतेचपुनर्द्वाभ्यांस
मेविष्णुःप्रसीदतु॥३०॥शमीगर्भ
स्ययोगर्भस्तस्यगर्भस्ययोरिपुः॥
रिपुगर्भस्ययोगर्भःसमेविष्णुःप्रसी ६
दतु॥३१॥अग्निसोमार्कताराणां

ब्रह्मरुद्रेंद्रयोगिनाम्।। यस्तेजयति
तेजांसि स मे विष्णुः प्रसीदतु।। ३२।।
पर्जन्यः पृथिवी सस्यं कालो धर्मक्रि
याफलम्।। गुणाकारः स मे वा भूर्वा
सुदेवः प्रसीदतु।। ३३।। योगावासन
मस्तुभ्यं सर्वावासवरप्रद।। हिरण्य
गर्भयज्ञांगपंचगर्भनमोस्तुते।।३४

चतुर्मूर्त्ते परं धाम लक्ष्म्यावास सदा
च्युत ॥ शब्दादिवासनान्योऽसिवासु
देव प्रधानकृत् ॥ ३५ ॥ अजः संगमनः
पार्थो ह्यमूर्तिर्विश्वमूर्त्तिधृक् ॥ श्रीः
कीर्त्तिः पंचकालज्ञो नमस्ते ज्ञानसा
गर ॥ ३६ ॥ अव्यक्तात् व्यक्तमुत्पन्न
मव्यक्ताद्यः परात्परः ॥ यस्मात्परतरं

नास्ति तमस्मि शरणगतः॥३७॥चिं
तयंतो ह्यजं नित्यं ब्रह्मेशानादयः सु
राः॥ निश्चयं नाधिगच्छंति तमस्मि
शरणं गतः॥३८॥ जितेंद्रिया जिता
त्मानो ज्ञानध्यानपरायणाः॥ यंप्रा
प्यन निवर्त्तंते तमस्मि शरणं गतः॥
॥३९॥एकांशेन जगत्कृत्स्नमवष्टभ्य

स्थितःप्रभुः॥अग्राह्योनिर्गुणोनि
त्यस्तमस्मिशरणंगतः॥४०॥सो
मार्काग्निमयंतेजोयाचतारामयी
द्युतिः॥दिविसंजायतेतेजःसमहा
त्माप्रसीदतु॥४१॥गुणात्मानिर्गु
णश्चान्योरश्मिवांश्चेतनोह्यजः॥सू
क्ष्मःसर्वगतोदेहःसमहात्माप्रसीद

तु ॥ ४२ ॥ अव्यक्तं सदधिष्ठानमचिंत्यं
तमसः परम् ॥ प्रकृतिः प्रकृतिं भुंक्ते
स महात्मा प्रसीदतु ॥ ४३ ॥ क्षेत्रज्ञः
पंचधा भुंक्ते प्रकृतिं पंचभिर्मुखैः ॥ म
हागुणांश्च यो भुंक्ते स महात्मा प्र-
सीदतु ॥ ४४ ॥ सांख्ययोगाश्च ये
चान्ये सिद्धाश्च परमर्षयः ॥ यं विदि

त्वा विमुच्यंते स महात्मा प्रसीदतु ॥४५

॥ अतींद्रिय नमस्तुभ्यं लिंगैर्व्यक्तैर्न

मीयसे ॥ ये च त्वां नाभिजानंति तम

स्मि शरणं गतः ॥४६॥ कामक्रोधवि

निर्मुक्ता रागद्वेषविवर्जिताः ॥ अन्य

भक्ता न जानंति न पुनर्नारकाजनाः

॥४७॥ एकांतिनो हि निर्द्वंद्वा निरा

ज्ञाः कर्मकारिणः ज्ञानाग्निदग्धकर्मा
णस्त्वां विशंति मनस्विनः ॥ ४८ ॥ अ
शरीरं शरीरस्थं समं सर्वेषु देहिषु ॥ पा
पपुण्यविनिर्मुक्ता भक्तास्त्वां पर्युपा
सते ॥ ४९ ॥ अव्यक्तबुद्ध्यहंकारमनो
भूतेंद्रियाणि च ॥ त्वयि तानि च तेषु त्वं
न तेषु त्वं न तानि ते ॥ ५० ॥ एकत्वायच्च

अ नानन्त्यं ये विदुर्यांति ते परम् ॥ समत्व स्मृ.
१० मिहकांक्षंति भक्त्या वै नान्यचेतसा
॥५१॥ चराचरमिदं सर्वं भूतग्रामं च
तुर्विधम् ॥ त्वयि तंतौ च तत्प्रोतं सूत्रे
मणिगणा इव ॥५२॥ स्रष्टा भोक्ता-
सि कूटस्थो ह्यचिंत्यः सर्वसंज्ञितः ॥ १०
अकर्ता हेतुरहितः पृथगात्माव्यवस्थि

तः ॥ ५३ ॥ नमे भूतेषु संयोगो न भूति
त्वं गुणातिगे ॥ अहंकारेण बुद्ध्या वा
न मे योगस्त्रिभिर्गुणैः ॥ ५४ ॥ न मे
धर्मो ह्यधर्मो वा नारंभो जन्म वा पुनः
॥ जरामरणमोक्षार्थं त्वां प्रपन्नोस्मि
सर्वगम् ॥ ५५ ॥ विषयैरिंद्रियैश्चा
पि न मे भूयः समागमः ॥ ईश्वरोऽसि

जगन्नाथ किमतः परमुच्यते ॥५६॥
भक्तानां यद्धितं देव तत्ते हि त्रिदशेश्व
र ॥ पृथिवीं यातु मे घ्राणं यातु मे रसनं
जलम् ॥५७॥ रूपं हुताशने यातु स्प
र्शो मे यातु मारुते ॥ श्रोत्रमाकाशम
भ्येतु मनो वैकारिकं पुनः ॥५८॥ इं
द्रियाणि गुणान्यांतु स्वेषु स्वेषु च यो

निषु ॥ पृथिवी यातु सलिलमापोऽग्नि
मनलो निलम् ॥ ५९ ॥ वायुराकाशम
भ्येतु मनश्चाकाशमेव च ॥ अहंकारं म
नो यातु मोहनं सर्वदेहिनाम् ॥ ६० ॥ अ
हंकारस्तथा बुद्धिं बुद्धिरव्यक्तमेव च
॥ प्रधानं प्रकृतिं यातु गुणसाम्ये व्यव
स्थिते ॥ ६१ ॥ विसर्गः सर्वकरणे गुण

अ॰ भूतैश्च मे भवेत् ॥ सत्वं रजस्तमश्चैव स्मृ
१२ प्रकृतिं प्रविशंतु मे ॥ ६२ ॥ नैष्कैवल्यं
पदं देवकांक्षेऽहं ते परंतप ॥ एकीभा
वस्त्वया मेस्तु न मे जन्म भवेत्पुनः ॥
॥ ६३ ॥ नमो भगवते तस्मै विष्णवे प्र
भविष्णवे ॥ त्वद्बुद्धिस्त्वद्गतप्राणस्त्व १२
द्भक्तस्त्वत्परायणः ॥ ६४ ॥ त्वामेवाहं

स्मरिष्यामि मरणे पर्य्यवस्थिते ॥ पूर्वदेहकृता ये मे व्याधयः प्रविशंतु माम् ॥ ६५ ॥ अर्दयंतु च मां दुःखान्यृणं मे प्रतिमुच्यताम् ॥ अनुध्येयोऽसि मे देव न मे जन्म भवेत्पुनः ॥ ६६ ॥ अस्माद्भावीमि कर्माणि ऋणं मे न भवेदिति ॥ उपतिष्ठंतु मां सर्वे व्याधयः पूर्वसंचि

अ॰ ता:॥६७॥ अनृणोगंतुमिच्छामित स्मृ॰
१३ द्विष्णोःपरमंपदम्॥ अहंभगवत
स्तस्य ममवासःसनातनः॥६८॥
तस्याहंन प्रणश्यामिसच्च मेनप्रण
श्यति॥कर्मेंद्रियाणिसंयम्य पंच
भूतेंद्रियाणिच॥६९॥दशेंद्रिया- १३
णिमनसि अहंकारं तथामनः॥अहं

कारं तथा बुद्धौ बुद्धिमात्मनि योजये
त् ॥ ७० ॥ आत्मबुद्धींद्रियं पश्येद्बुद्ध्या
बुद्धेः परात्परम् ॥ एवं बुद्धेः परं बुध्वा
सस्तभ्यात्मानमात्मना ॥ ७१ ॥ ततो
बुद्धेः परं बुध्वा लभते न पुनर्भवम् ॥
ममायमितितस्याहं येन सर्वमिदं त
तम् ॥ ७२ ॥ आत्मन्यात्मनि संयोज्य

अ॰ परात्मानमनुस्मरेत् ॥ नमो भगवते स्मृ॰
१४ तस्मै देहिनां परमात्मने ॥ ७३ ॥ ना
रायणाय भक्ताय एकनिष्ठाय शा
श्वते ॥ हृदिस्थाय च भूतानां सर्वेषां
च महात्मने ॥ ७४ ॥ इमामनुस्मरन्
दिव्यां वैष्णवीं पापनाशिनीम् ॥ स्व १४
पन्विबुध्य च पठेद्यत्नेन च समभ्यसे

त्॥७५॥मरणेसमनुप्राप्ते यदेकंमा
मनुस्मरेत्॥अपिपापसमाचारः स
यातिपरमांगतिम्॥७६॥यद्यहंकार
माश्रित्य यज्ञदानतपःक्रियाः॥कुर्व
न्फलमवाप्नोति पुनरावर्त्तनंचतत् ॥
॥७७॥अभ्यर्चयन् पितॄन्देवान्पठन्
जुह्वन्बलिंददन्॥ज्वलदग्निंस्मरेद्यो

अ· मांलभते परमांगतिम्॥ ७८॥ यज्ञो स्मृ·
१५ दानंतपश्चैव पावनानि मनीषिणाम्
॥यज्ञंदानंतपस्तस्मात्कुर्याद्रागवि
वर्जितः॥ ७९॥ पौर्णमास्याममायां
चद्वादश्यांचतथैवच॥ श्रावयेत् श्रद्ध
धानस्य मद्भक्तस्य विशेषतः॥ ८०॥ न १५
मइत्येव योब्रूयान्मद्भक्तः श्रद्धयान्वि

तः ॥ तस्मात्क्षयो भवेल्लोकः श्वपाकस्या
पि नारद ॥ ८१ ॥ किं पुनर्ये भजंते मां
साधका विधिपूर्वकम् ॥ श्रद्धावंतो य
तात्मानस्ते यांति परमां गतिम् ॥ ८२ ॥
कर्माण्याद्यंतवंतीह मद्भक्तोऽनंतम
श्नुते ॥ मामेव तस्माद्देवर्षे ध्याहि नि-
त्यमतंद्रितः ॥ ८३ ॥ अज्ञानां चैव यो

अ ज्ञानंदद्याद्धर्मोपदेशतः॥कृत्स्नांवापृ स्मृ
१६ थिवींदद्यात्तेनतुल्यंचतत्फलम्॥८४
॥तस्मात्प्रदेयंसाधुभ्योजपंबंधभया
पहम्॥अवाप्स्यसिततःसिद्धिंप्राप्स्य
सेत्त्वपदंमम॥८५॥अश्वमेधसहस्रै
श्चवाजपेयशतैरपि॥नासौपदम १६
वाप्नोतिमद्भक्तैर्यदवाप्यते॥८६॥

भीष्मउवाच॥ ॥हरेःपृष्टंपुरातेननार
देनसुरर्षिणा॥यदुवाचततःशंभुस्त
दुक्तंसमनुव्रतः॥८७॥त्वमप्येकम
नाभूत्वाध्याहिध्येयंगुणाधिकम्॥
भजस्वसर्वभावेनपरमात्मानमव्य
यम्॥८८॥श्रुत्वैवंनारदोवाक्यंदि
व्यंनारायणोदितम्॥अत्यंतभक्ति

मान्देवमेकांतित्वमुपेयिवान्॥८९॥
नारायणमृषिं देवं दशवर्षाण्यनन्य
भाक्॥ इमं जपित्वा चाप्नोति तद्विष्णोः
परमं पदम्॥९०॥ किं तस्य बहुभिर्मं
त्रैः किं तस्य बहुभिर्व्रतैः॥ नमो नारा
यणायेति मंत्रः सर्वार्थसाधकः॥९१
॥ किं तस्य दानैः किं तीर्थैः किं तपोभिः


किमध्वरैः ॥ यो नित्यं ध्यायते देवं ना
रायणमनन्यधीः ॥ १२ ॥ ये नृशंसा दु
रात्मानः पापाचाररतास्तथा ॥ ते पि यां
ति परं स्थानं नारायणपरायणाः ॥ १३
अनन्यया मंदबुद्ध्या प्रतिभाति दुरात्म
नाम् ॥ कुतर्काज्ञानदृष्टीनां विघ्नांतेंद्रि
यवर्त्मनाम् ॥ १४ ॥ नमो नारायणाये

अ· तियेविदुर्ब्रह्मशाश्वतम्॥ अंतकाले स्मृ·
१८ जपन्यांतितद्विष्णोःपरमंपदं॥१५
आचारहीनोऽपिमुनिप्रवीर भक्त्या
विहीनोऽपिविनिंदितोऽपि॥ किंत
स्यनारायणशब्दमात्रतो विमुक्तपा
पो विशतेऽच्युतांगतिम्॥१६॥ कां १८
तारवनदुर्गेषुकृच्छ्रेष्वापत्सुसंयुगे

॥दस्युभिःसन्निरुद्धश्चनामाभिर्मां
प्रकीर्तयेत्॥९७॥जन्मांतरसहस्रे
षुतपोध्यानसमाधिभिः॥नराणां-
क्षीणपापानांकृष्णेभक्तिःप्रजायते
॥९८॥नाम्नोऽस्तियावतीशक्तिःपाप
निर्हरणेहरेः॥श्वपचोऽपिनरःकर्तुंक्षम
स्तावन्नकिल्बिषम्॥९९॥नतावत्पाप

अ॰ मस्तीहयावन्नामाहृतंहरेः॥अतिरेकभ स्मृ॰
१९ यादाहुःप्रायश्चित्तांतरंवृथा॥१००॥ग
त्वागत्वानिवर्त्तंतेचंद्रसूर्यादयोग्रहाः॥
अद्यापिननिवर्त्तंतेद्वादशाक्षरचिंत
काः॥१॥नवासुदेवात्परमस्तिमंगलं
नवासुदेवात्परमस्तिपावनं॥नवासुदे १९
वात्परमस्तिदैवतंतंवासुदेवंप्रणमन्न

सीदति ॥ २ ॥ इमां रहस्यं परमामनुस्मृ
तिं योधीत्य बुद्धिं लभते च नैष्ठिकीम्
॥ विहाय पापं विनिमुच्य संकटात् स
वीतरागो विचरेन्महीमिमाम् ॥ ३ ॥
इति श्रीमन्महाभारते शतसाहस्र्यां संहितायामानु-
शासनिके पर्वणि मो० श्रीविष्णोर्दिव्यमनुस्मृतिस्तो
त्रं संपूर्णम् ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥


इति अत्रिस्मृतिः समाप्ता

अथगजेंद्रमोक्षप्रा०



श्रीगणेशायनमः॥ ॥शतानीकउवाच॥ ॥मया हि देवदेवस्य विष्णोरमिततेजसः॥श्रुताःसम्भूतयःसर्वा गदतस्तवसुव्रत॥१॥यदिप्रसन्नोभगवाननुग्राह्योऽस्मिवायदि॥तदहंश्रोतुमिच्छामि नृणां दुःस्वप्ननाशनम्॥२॥स्वप्नादिषु महाभाग दृश्यंते ये शुभाशुभाः॥

गी॰ फलानिचप्रयच्छंतितद्गुणान्येवभा मो॰

१ र्गव॥३॥ताट्टक्पुण्यंपवित्रंचनृणा

मतिशुभप्रदम्॥दुष्टस्वप्नोपशमनंत

न्मेविस्तरतोवद॥४॥ ॥शौनकउवा

च॥ ॥इदमेवमहाभाग पृष्टवांश्च

पितामहम्॥भीष्मंधर्मभृतांश्रेष्ठंध १

र्मपुत्रोयुधिष्ठिरः॥५॥भीष्मउवाच॥

॥ जितं ते पुंडरीकाक्ष नमस्ते विश्वभा
वन ॥ नमस्तेऽस्तु हृषीकेश महापुरुष
पूर्वज ॥ ६ ॥ आद्यं पुरुषमीशानं पुरुहू
तं पुरातनम् ॥ ऋतमेकाक्षरं ब्रह्म व्यक्ता
व्यक्तं सनातनम् ॥ ७ ॥ असच्च सच्च य
द्विश्वं नित्यं सदसतः परम् ॥ परापरा
णां स्रष्टारं पुराणं परमव्ययम् ॥ ८ ॥

ग. मांगल्यं मंगलं विष्णुं वरेण्यमनघं शु मो.
२ चिम् ॥ नमस्कृत्य हृषीकेशं चराचरगु
रुं हरिम् ॥ ९ ॥ प्रवक्ष्यामि मतं पुण्यं
कृष्णद्वैपायनस्य च ॥ येनोक्तेन श्रु
तेनापि नश्यते सर्वपातकम् ॥ १० ॥
नारायणसमो देवो न भूतो न भवि २
ष्यति ॥ एतेन सत्यवाक्येन सर्वार्था

न्साधयाम्यहम् ॥११॥ किं तस्य बहु
भिर्मंत्रैः किं तस्य बहुभिर्व्रतैः ॥ नमो
नारायणायेति मंत्रः सर्वार्थसाधकः
॥१२॥ जज्ञे बहुज्ञं परमत्युदारं यं द्वीप
मध्ये सुतमात्मवंतम् ॥ पराशराद्गंध
वती महर्षेस्तस्मै नमोऽज्ञानतमोनु
दाय ॥१३॥ नमो भगवते तस्मै व्यासा

ग. यामिततेजसे ॥ यस्य प्रसादाद्वक्ष्या मो.
३ मिनारायणकथामिमाम् ॥१४॥ वै
शंपायनमासीनं पुराणार्थविचक्ष
णम् ॥ इममर्थं सराजर्षिः पृष्टवान्ज
नमेजयः ॥१५॥ ॥जनमेजयउवाच
॥ ॥ किंजपन्मुच्यते पापात् किंज ३
पन्सुखमश्नुते ॥ दुःस्वप्ननाशनं पु

ण्यं श्रोतुमिच्छामि मानद ॥१६॥
वैशंपायन उवाच ॥ ॥ देवव्रतं महा
प्राज्ञं सर्वशास्त्रविशारदम् ॥ विन
येनोपसंगम्य पर्यपृच्छद्युधिष्ठिरः
॥१७॥ युधिष्ठिर उवाच ॥ ॥ दुःस्व
प्न दर्शनं घोरमवेक्ष्य भरतर्षभ ॥ प्र
यतः किं जपेज्जाप्यं विबुधः किमनु

स्मरेत् ॥१८॥ कस्यकुर्यान्नमस्का
रंप्रातरुत्थायमानवः॥ किंचध्याये
तसततंकःपूज्योवाभवेत्सदा॥१९॥
पितामहप्रसादेनबुद्धिभेदोभवेन्न
मे॥ तदहंश्रोतुमिच्छामिब्रूहिनोवद
तांवर॥२०॥ ॥भीष्मउवाच॥ ॥शृ
णुराजन्महाबाहोवर्णयिष्येहिशां

तिदम् ॥ दुःस्वप्नदर्शने जाप्यं यद्वै नि
त्यं समाहितैः ॥ २१ ॥ अत्राप्युदाहरं
तीम मितिहासं पुरातनम् ॥ गजेंद्रमो
क्षणं पुण्यं कृष्णस्याक्लिष्टकर्मणः ॥
॥ २२ ॥ सर्वरत्नमयः श्रीमान् त्रिकूटो
नाम पर्वतः ॥ सुतः पर्वतराजस्य सुमे
रोर्भास्करद्युतेः ॥ २३ ॥ क्षीरोदजल

रा० वीच्यग्रैर्धौतामलशिलातलः॥उत्थि मो०
५ तःसागरंभित्वादेवर्षिगणसेवितः
॥२४॥अप्सरोभिःपरिवृतःश्रीमा
न्प्रस्रवणाकुलः॥गंधर्वैःकिन्नरैर्य
क्षैःसिद्धचारणपन्नगैः॥२५॥मृगैः
शाखामृगैःसिंहैर्मातंगैश्चसदामदैः ५
वृकर्क्षापिवराहाद्यैर्वृतगात्रो विराजते

॥२६॥पुन्नागैः कर्णिकारैश्च सुबि
ल्वैर्दिव्यपाटलैः॥चूतनिंबकदंबै-
श्चचंदनागुरुचंपकैः॥२७॥शालै
स्तालैस्तमालैश्च तरुभिश्चार्जुनै-
स्तथा॥बकुलैः कुंदपुष्पैश्च सरलैर्दे
वदारुभिः॥२८॥मंदारकुसुमैश्चा
न्यैः पारिजातैश्च सर्वतः॥एवं बहुवि

ग॰ धैर्वृक्षैः शोभितः समलंकृतः ॥२९॥ मो॰
६ नानाधात्वंकितैः शृंगैः प्रस्रवद्भिः स
मंततः ॥ जीवजीवकसंघुष्टं चकोर
शिखिनादितम् ॥३०॥ पद्मरागस
मप्रख्यं ज्वालापुंजमिवोत्थितम् ॥
तस्यैकं कांचनं शृंगं सेवते यद्दिवाक ६
रः ॥३१॥ नानापुष्पैः समाकीर्णं ना

नागैधैःसमाकुलम् ॥ द्वितीयंराज
तंशृंगंसेवतेयन्निशाकरः॥३२॥
पांडुरांबुदसंकाशंतुषाराचलसन्नि
भम् ॥ वज्रेंद्रनीलवैडूर्यतेजोभिर्भा
सयन्नभः॥३३॥ तृतीयंब्रह्मसद
न प्रकृष्टंशृंगमुत्तमम् ॥ अत्यद्भुतं
महासानु विचित्रसरसद्रुमं ॥३४॥

ग॰ विद्याधरपुरं तत्र हेमप्राकारतोरण मो॰

७ म्। तरुणादित्यसंकाशं तप्तकांच

नसन्निभम्॥३५॥बालस्फटिक

सोपानं वैडूर्यसुशिलातलं॥जांबून

दमहद्दिव्यं नानारत्नोपशोभितम्॥

॥३६॥अप्सरोगणसंकीर्णं सिद्धगं ७

धर्वसेवितम्॥पद्मरागसमप्रख्यं

तारागणसमान्वितम् ॥ ३७ ॥ नैतत्कृ
तघ्नाः पश्यंति न नृशंसा न नास्तिकाः
॥ नातप्ततपसो लोके ये च पापकृतो न
राः ॥ ३८ ॥ नानाराधितगोविंदाः शै
लं पश्यंति ते नराः ॥ तस्य सानुमतः पृ
ष्ठे सरः कांचनपंकजम् ॥ ३९ ॥ कारंड
वसमाकीर्णं राजहंसोपशोभितम् ॥

ग ८

मत्तभ्रमरसंघुष्टंचकोरशिखिनादितं
॥४०॥कमलोत्पलकल्हारपुंडरीकोप
शोभितं॥कमलैःशतपत्रैश्चकांचनैःस
मलंकृतं॥४१॥पत्रैर्मरकतप्रख्यैःपु
ष्पैःकांचनसन्निभैः॥गुल्मैःकीचकवे
णूनांसमंतात्परिवारितं॥४२॥अत्यद्भु
तंमहास्थानंविचित्रशिखराकुलं॥रा

मो० ८

तं योजनविस्तीर्णं दशयोजनमायतं ॥ ४३ ॥
पंचयोजनमूर्द्धानं सर एतत्प्रमाणतः ॥
हिमखंडोदकं राजन् सुस्वादममृतोप
मम् ॥ ४४ ॥ त्रैलोक्ये दृष्टपूर्वं च यत्तत्
सरमनुत्तमम् ॥ सुप्रसन्नं सरो दिव्यं
देवानामपि दुर्लभम् ॥ ४५ ॥ खातेन
द्विगुणं प्रोक्तं शरद्द्यौरिव निर्मलम् ॥

 उपहारायदेवानां सिद्धाद्यर्जितपंक
 जम् ॥४६॥ तस्मिन्सरसिदुष्टात्मा
विरूपोंतर्जलाशयः ॥ आसीद्ग्राहो
गजेंद्राणां दुराधर्षो महाबलः ॥४७॥
अथदंतोज्ज्वलमुखः कदाचिद्गजयू
थपः ॥ आजगामतृषाक्रांतः करेणु
परिवारितः ॥४८॥ मदस्रावीजला

कांक्षी पादचारीव पर्वतः ॥ वासयन्
मदगंधेन महानैरावतोपमः ॥ ४९ ॥
गजो ह्यंजनसंकाशो मदाच्चलितलो
चनः ॥ तृषितः पातुकामोऽसाववती
र्णो महान्ह्रदे ॥ ५० ॥ पिबतस्तस्य तत्
तोयं ग्राहः समुपपद्यत ॥ सुलीनः पं
कजवने यूथमध्यगतः करी ॥ ५१ ॥ गृ

ग. हीतस्तेनरौद्रेण ग्राहेणाव्यक्तमूर्त्तिना मो.
१० ॥पश्यंतीनांकरेणूनां क्रोशंतीनांच
दारुणम् ॥५२॥नीयतेपंकजवने
ग्राहेणातिबलीयसा ॥ गजश्चाकर्ष
ते तीरं ग्राहश्चाकर्षतेजलम् ॥५३॥
तयोरासीन्महद्युद्धं दिव्यवर्षसहस्र १०
कम् ॥दारुणैःसंयतःपाशैर्निष्प्रय

त्वगतिः कृतः ॥५४॥ वेष्ट्यमानः स
घोरैस्तु पाशैर्नागो दृढैस्तथा ॥ विस्फू
र्य च यथाशक्त्या विक्रोशंस्तु महार
वान् ॥५५॥ व्यथितः स निरुत्साहो
गृहीतो घोरकर्मणा ॥ परमापदमा
पन्नो मनसाऽचिंतयद्धरिम् ॥५६॥
स तु नागवरः श्रीमान्नारायणपरा-

ग· यणः ॥ तमेवशरणंदेवंगतःसर्वा मो·
११ त्मनातदा ॥ ५७ ॥ एकाग्रोनिगृहीता
त्माविशुद्धेनांतरात्मना ॥ जन्मजन्मां
तराभ्यासाद्भक्तिमान् गरुडध्वजे ॥
॥ ५८ ॥ नान्यंदेवंमहादेवात्पूजया
मासकेशवात् ॥ दिग्बाहुंस्वर्गमूर्द्धा ११
नंभूःपादंगगनोदरम् ॥ ५९ ॥ आदि

स्यचंद्रनयनमनंतं विश्वतोमुखम् ॥
भूतात्मानं च मेघाभं शंखचक्रगदा
धरम् ॥ ६० ॥ सहस्रशुभनामानमा
दिदेवमजं विष्णुम् ॥ प्रगृह्य पुष्कर
ग्रेण कांचनं कमलोत्तमम् ॥ ६१ ॥ नै
वेद्यं मनसा ध्यात्वा पूजां कृत्वा जना
र्दने ॥ आपद्विमोक्षमन्विच्छन्गजः

स्तोत्रमुदीरयत् ॥६२॥ ॥गजेंद्रउ
वाच॥ ॥नमोमूलप्रकृतये अजिता
यमहात्मने॥ अनाश्रयायदेवाय निः
स्पृहायनमोनमः॥६३॥नमआद्याय
बीजाय आर्षेयाय महात्मने॥ अनं
तराय चैकाय अव्यक्तायनमोनमः
॥६४॥ नमो गुह्याय गूढाय गुणाय

गुणवर्त्तिने ॥ अतर्क्यायाप्रमेयाय
अतुलाय नमोनमः ॥ ६५ ॥ नमः शि
वाय शांताय निश्चिंताय यशस्विने ॥
सनातनाय पूर्वाय पुराणाय नमो न
मः ॥ ६६ ॥ नमो जगत्प्रतिष्ठाय गोविं
दाय नमोनमः ॥ नमोऽस्तु पद्मना-
भाय सांख्ययोगोद्भवाय च ॥ ६७ ॥

ग. विश्वेश्वरायदेवाय शिवायहरयेन मो
१३ मः॥ नमोस्तु तस्मै देवाय निर्गुणा
य गुणात्मने॥६८॥नमोदेवाधिदे
वाय स्वभावायनमोनमः॥नाराय
णाय विश्वायदेवानां परमात्मने॥
॥६९॥ नमोनमः कारणवामनाय १३
नारायणायामितविक्रमाय॥श्री

शार्ङ्गचक्रासिगदाधराय नमोऽस्तु
तस्मै पुरुषोत्तमाय ॥७०॥ गुह्याय
वेदनिलयाय महोदराय सिंहाय दै
त्यनिधनाय चतुर्भुजाय ॥ ब्रह्मेंद्ररु
द्रमुनिचारणसंस्तुताय देवोत्तमाय
वरदायनमोऽच्युताय ॥७१॥ नागें
द्रदेहशयनासनसुप्रियाय गोक्षी

रहेमशकनीलघनोपमाय ॥पीतां
बराय मधुकैटभनाशनाय विश्वा
यचारुमुकुटाय नमोक्षराय ॥ ७२॥
नाभिप्रजातकमलस्थचतुर्मुखाय
क्षीरोदकार्णवनिकेतनशोभनाय
॥नानाविचित्रमुकुटांगदभूषणाय
योगीश्वराय पुरुषाय नमोवराय ॥

॥७३॥ भक्तिप्रियाय वरदीप्तसुद
र्शनाय फुल्लारविंद विपुलायतलो-
चनाय ॥ देवेंद्रविघ्नशमनोद्यतपौरु
षाय नारायणाय विरजाय नमोऽस्तु
ताय ॥ ७४ ॥ नारायणाय नरलोकप
रायणायकालायकालकमलायत
लोचनाय ॥ रामायरावणविनाशकृ

ग॰ तोद्यमाय धीराय धीरतिलकाय महो मे॰
१५ दराय ॥७५॥ पद्मासनाय मणिकुंडल
भूषणाय कंसांतकाय शिशुपालवि
नाशनाय ॥ गोवर्द्धनाय सुरशत्रुनिकृं
तनाय दामोदराय वरदाय नमो वराय
॥७६॥ ब्रह्मायनाय त्रिदशाधिपाय १५
लोकायनायात्मभवोद्भवाय ॥ नारा

यणायार्तिविनाशनाय महावराहा
य नमस्करोमि ॥७७॥ कूटस्थमव्य
क्तमचिंत्यरूपं नारायणं कारणमा
दिदेवम् ॥ युगांतशेषं पुरुषं पुराणं तं
वासुदेवं शरणं प्रपद्ये ॥७८॥ अहृश्य
मच्छेद्यमनंतमव्ययं महर्षयो ब्रह्मम
यं सनातनम् ॥ वदंति यं वै पुरुषं पुरा

णंतंवासुदेवंशरणंप्रपद्ये ॥ ७९ ॥ उ
त्तिष्ठतस्तस्यजलार्द्ररुक्षोर्महावरा
हस्यमहीं विदार्य ॥ वितन्वतोवेदमयं
शरीरंलोकांतरस्थामुनयोवदंति
॥ ८० ॥ योगेश्वरंचारुविचित्रमौलिं
ज्ञेयंसमस्तंप्रकृतेःपरस्तात् ॥ क्षेत्रज्ञ
मात्मप्रभवंवरेण्यंतंवासुदेवंशरणं

प्रपद्ये ॥८१॥ कार्यं क्रियाकारणमप्र
मेयं हिरण्यबाहुं वरपद्मनाभम् ॥
महाबलं वेदनिधिं सुरोत्तमं व्रजामि
विष्णुं शरणं जनार्दनम् ॥८२॥ कि
रीटकेयूरमहार्हनिष्कैरत्यंतमालंकृ
तसर्वगात्रम् ॥ पीतांबरं कांचनभ
क्तिचित्रमालाधरं केशवमभ्युपैमि

ग॰ ॥८३॥ भवोद्भवं वेदविदां वरिष्ठमादि मो॰
१७ त्यचंद्राग्निवसुप्रभावम् ॥ योगात्म
कं सांख्यविदां वरिष्ठं प्रभुं प्रपद्येऽच्यु
तमात्मवंतम् ॥८४॥ यदक्षरं ब्रह्म व
दंति सर्वगं निशाम्य यन्मृत्युमुखात्प्र
मुच्यते ॥ तमीश्वरं तुष्टमनुत्तमैर्गु १७
णैः सनातनं लोकगुरुं स्मरामि ॥८५

॥ श्रीवत्सांकं महादेवं वंदे गुह्यमनुत्त
मम् ॥ प्रपद्ये सूक्ष्ममचलं वरेण्यमभ
यप्रदम् ॥ ८६ ॥ नमस्तस्मै वराहाय
लीलयोद्धरते महीम् ॥ खुरमध्यगतो
यस्य मेरुः खुरखुरायते ॥ ८७ ॥ प्रभ
वं सर्वभूतानां निर्गुणं परमेश्वरम् ॥ प्र
पद्ये मुक्तसंगानां यतीनां परमां गति

ग. म् ॥ ८८ ॥ भगवंतं गुणाध्यक्षमक्षरं मो.
१८ परमं पदम् ॥ शरण्यं शरणार्तानां प्र
पद्ये भक्तवत्सलम् ॥ ८९ ॥ त्रिविक्र
मं त्रिलोकेशं सर्वेषां प्रपितामहम् ॥
योगात्मानं महात्मानं प्रपद्येऽहं जना
र्दनम् ॥ ९० ॥ आदिदेवमजं विष्णुं व्य १८
क्ताव्यक्तं सनातनम् ॥ नारायणम

णीयांसं प्रपद्येब्राम्हणप्रियम् ॥ ११
॥ अकूपाराय देवाय नमः सर्वमहा
त्मने ॥ प्रपद्ये देवदेवेश मणीयांसम
णोर्यथा ॥ १२ ॥ लोकत्रयाय चैकाय
परतः परमात्मने ॥ नमः सर्वत्रशिरसे
अनंताय महात्मने ॥ १३ ॥ तमेव परमं
देवमृषयो वेदपारगाः ॥ कीर्त्तयंतित्वयं

 सर्वेब्रह्मादीनांपरायणम् ॥१४॥न
 मस्ते पुंडरीकाक्ष भक्तानामभयंक
र॥सुब्रह्मण्यनमस्तेऽस्तुत्राहिमां
शरणागतम् ॥१५॥तावद्भवति मेदुः
खंचिंतासंसारसागरे॥यावत्कम
लपत्राक्षनस्मरामिजनार्दनम्॥१६
॥भीष्मउवाच॥ ॥भक्तिंतस्यतु

संचिंत्य नागस्यामोघसंस्तवम् ॥
प्रीतिमानभवद्राजन् श्रुत्वा चक्रग
दाधरः ॥१७॥ आरुह्य गरुडं विष्णु
राजगाम सुरोत्तमः ॥ सान्निध्यं क
ल्पयामास तस्मिन्सरसि लोकधृक्
॥१८॥ ग्राहग्रस्तं गजेंद्रं च तं ग्राहं च
जलाशयात् ॥ उज्जहाराप्रमेया-

ग. त्मा तरसा मधुसूदनः ॥ ९९ ॥ जलस्थं मो.
२० दारयामास ग्राहं चक्रेण माधवः ॥
मोचयामास नागेंद्रं पापेभ्यः शर
णागतम् ॥ १०० ॥ स हि देवलशापे
न हूहूर्गंधर्वसत्तमः ॥ ग्राहत्वमगम
त्कृष्णात् वधं प्राप्य दिवं गतः ॥ इद २०
मप्यपरं गुह्यं राजन् पुण्यतमं शृणु

॥१॥ ॥युधिष्ठिर उवाच॥ ॥कथं
शापोद्भवं नाम गंधर्वाणां महात्मना
म्॥ एतदिच्छाम्यहं श्रोतुं विस्तरेण
पितामह॥२॥ ॥भीष्म उवाच॥
हाहाहूहूरिति ख्यातौ गीतवाद्यवि
शारदौ॥ इति तौ शापितौ तेन देवले
न महात्मना॥३॥ उर्वशी मेनका रं

ग. भातथाचान्येऽप्सरोगणाः॥शक्र मो.
२१ स्य पुरतो राजन् नृत्यंते ताः सुमध्य
माः॥४॥ततस्तौ गायमानौ तु गंध
र्वौ राजसद्मनि॥अन्योन्यं चक्रतुः
स्पर्धां शक्रस्य पुरतस्तदा॥५॥आ
वयोरुभयोर्मध्ये कः श्रेष्ठो गीतवा २१
द्ययोः॥तं वदस्व सुरश्रेष्ठ ज्ञात्वा गी

तस्य लक्षणम् ॥ ६ ॥ गंधर्वयोर्वचः

श्रुत्वा प्रत्युवाच शतक्रतुः ॥ युवयो

र्गीत वाद्येषु विशेषो नोपलक्ष्यते ॥

॥ ७ ॥ एक एव मुनिश्रेष्ठो देवलोना

मनामतः ॥ युवयोः संशयच्छेत्ता

भविष्यतिन संशयः ॥ ८ ॥ ततस्तु

तौ शक्रवचो निशम्य प्रणम्य राज

ग. न् शिरसा सुरेश्वरम् ॥ गतौ सुहृष्टौ मो.
२२ जयकांक्षिणौ तौ यत्राश्रमे तिष्ठति
स द्विजाग्र्यः ॥ ९ ॥ ततो दृष्ट्वा मुनिश्रे
ष्ठं देवलं शंसितव्रतम् ॥ अभिवाद्य
महात्मानं प्रोचतुः पार्श्वसंस्थितौ
॥ १० ॥ शक्रेण प्रेषितौ देव त्वत्समी २२
पे द्विजोत्तम ॥ एकस्य च जयं देहि

यत्ते मनसि रोचते ॥११॥ पृथक्च
रंतौ गायंतौ सुचिरं मधुरस्वरम् ॥
न किंचिद्वदते वाक्यं मुनिर्मौनस्य
धारणात् ॥१२॥ शृण्वन्नपि पदं ते
षां न किंचिद्वदते मुनिः ॥ तदा तौ कु
पितौ तस्य देवलस्य महात्मनः ॥
॥१३॥ ऊचतुस्तौ तदा वाक्यं गंधर्वौ

ग० कालनोदितौ ॥ मूढोऽयं नाभिजा मो०
२३ नाति निश्चयं वाद्यगीतयोः ॥१४॥
निशम्यैतद्वचस्तेषां गंधर्वाणां म
दान्वितम् ॥ क्रोधादुत्थाय विप्रेंद्र
इदं वचनमब्रवीत् ॥१५॥ एष हूहू
दुरात्मा तु ग्राहत्वं यातु मूढधीः ॥ २३
त्वमेव गजराजस्तु भवस्व गिरिग

ह्वरे ॥१६॥ ततस्तौ शापितौ तेन देवले
न महात्मना ॥ प्रणम्य शिरसा विप्रं
गंधर्वाविदमूचतुः॥१७॥ भूमंडलग
तौ ह्यावां प्रसादं कुरु सत्तम ॥ निश्च
यं वद विप्रेंद्र येन शापाद्विमुच्यतः १८
॥ ततस्तौ पुरतो दृष्ट्वा उभौ शापभया
र्दितौ ॥ प्रत्युवाच मुनिश्रेष्ठो गंधर्वौ तौ

भयान्वितो॥१९॥मेरुपृष्ठे सरो रम्यं
बहुवृक्षसमाकुलम्॥नानापक्षिनि
नादाढ्यं द्वितीयइव सागरः॥२०॥
तस्मिन्सरोवरे रम्ये नित्यं ग्राहो भवि
ष्यसि॥तृषार्तस्तत्र मातंगो गमिष्य
ति न संशयः॥२१॥तयोर्मध्ये महद्यु
द्धं भविष्यति सुदारुणम्॥ग्राहेणा

कृष्यमाणस्तु गजः स्तोत्रं करिष्यति
॥२२॥ तदैव देवदेवेशस्तुष्यते नात्र सं
शयः॥ ततो नारायणः प्रीतः शापतो
मोचयिष्यति॥२३॥ इत्युक्त्वाद्दृषि-
णा तेन वरेणैतौ प्रमोदितौ॥ ॥भी-
ष्म उवाच॥ ॥एवं परावार्त्तभृतौ श्रुत्वा
सीद्भगवानिह॥२४॥ श्रीभगवानुवाच

ग. ॥क्रोधोऽपिवरतुल्योऽयमापदंतंप्र मो.
२५ यच्छतु॥आपद्विमुक्तौयुगपद्गजो
गंधर्वएवच॥२५॥गजोपिमुक्ततां
यातःश्रीकृष्णेनविमोक्षितः॥तस्मा
च्छापाद्विनिर्मुक्तःप्रागिवाविकृतोऽ
भवत्॥२६॥तौचस्वंस्वंवपुःप्राप्य २५
प्रणिपत्यजनार्दनम्॥गजोगंधर्व

राजश्च परां निर्वृतिमागतौ ॥२७॥
प्रीतिमान् पुंडरीकाक्षः शरणागत
वत्सलः ॥ अभवत्तत्र देवेशस्ताभ्यां
चैव प्रपूजितः ॥२८॥ इदं चैव महाबा
हो देवस्य च प्रभाषितम् ॥ भजंतं ग
जराजानमवदन्मधुसूदनः ॥२९॥
श्रीभगवानुवाच ॥ ॥ योमां वांचस

गं॰ रश्चैव ग्राहस्यच विदारणम् ॥ गुल्म मो॰
२६ कीचकवेणूनां तंच शैलवरं तथा ॥
॥ ३० ॥ अश्वत्थं भास्करं गंगां नैमि
षारण्य पुष्करम् ॥ प्रयागं ब्रह्म ती
र्थंच दंडकारण्य मेवच ॥ ३१ ॥ पुरा
णं रामचरितं भारताख्यानमुत्तम २६
म् ॥ विभूतिं विश्वरूपंच स्तवराज

मनुस्मृतिम् ॥ ३२ ॥ प्रणवं च कुरु
क्षेत्रं गरुडं मेरुपर्वतम् ॥ रूपं कांच
नगुल्मानां रूपं मेरोः कृतस्य च ॥
॥ ३३ ॥ ये स्मरिष्यंति मनुजाः प्रय
ताः स्थिरबुद्धयः ॥ दुःस्वप्नो नश्यते
तेषां सुस्वप्नश्च भविष्यति ॥ ३४ ॥ अ
निरुद्धं गजं ग्राहं वासुदेवं महाद्युतिम्

॥संकर्षणं महात्मानं प्रद्युम्नंच तथै
वच॥३५॥मत्स्यं कूर्मंच वाराहं वाम
नं तार्क्ष्यमेवच॥नारसिंहं चनागेंद्रं
सृष्टिसंहारकारकं॥३६॥विश्वरू
पं हृषीकेशं गोविंदं मधुसूदनम्॥
त्रिदशैर्वंदितं देवं दृढभक्तिमनूपम
म्॥३७॥वैकुंठं दुष्टदमनं भक्तिदं म

धुसूदनम् ॥ एतानि प्रातरुत्थाय
संस्मरिष्यंति ये नराः ॥ ३८ ॥ सर्व
पापैः प्रमुच्यंते सर्वलोकमवाप्नुयुः
॥ भीष्म उवाच ॥ ॥ एवमुक्त्वा महा
राज गजेंद्रं मधुसूदनः ॥ ३९ ॥ स्पर्श
यामास हस्तेन गजं गंधर्वमेव च ॥
तौ च स्पृष्टौ ततः सद्यो माल्यांबरध

ग. राबुभौ ॥४०॥तमेव मनसा प्राप्य ज मो.
२८ ग्मतुस्त्रिदशालयम् ॥ ततो दिव्य
वपुर्भूत्वा हस्तिराट् परमं पदं ॥४१॥
गच्छतिस्म महाबाहो नारायणपरा
यणौ ॥ ततो नारायणः श्रीमान्मोक्ष
यित्वा गजोत्तमम् ॥४२॥ ऋषिभिः २८
स्तूयमानोऽग्र्यैर्वेदगुह्यपदाक्षरैः ॥

ततस्तु भगवान्विष्णुर्दुर्विज्ञेयगतिः प्र
भुः॥ ४३॥ शंखचक्रगदापाणिरंतर्धा
नं युधिष्ठिर॥ गजेंद्रमोक्षणं दृष्ट्वा स
र्वे प्रांजलयस्तदा॥ ४४॥ ववंदिरे म
हात्मानं प्रभुं नारायणं परम्॥ विस्म
योत्फुल्लनयनाः प्रजापतिपुरःसराः
॥ ४५॥ य इदं शृणुयान्नित्यं प्रातरु

ग. स्थाय मानवः॥ प्राप्नुयात्परमां सि मो.
२९ द्धिं दुःस्वप्नस्तस्य नश्यति॥४६॥ग
जेंद्रमोक्षणं पुण्यं सर्वपापप्रणाशन
म्॥ श्रावयेत्प्रातरुत्थाय दीर्घमायु
रवाप्नुयात्॥४७॥ श्रुतेन हि कुरुश्रे
ष्ठ स्तुतेन कथितेन च॥ गजेंद्रमोक्ष- २९
णेनैव सद्यः पापात्प्रमुच्यते॥४८॥

मया ते कथितं राजन्पवित्रं पापना
शनम्॥ कीर्तयस्व महाबाहो गजेंद्र
स्य महात्मनः॥ ४९॥ चरितं पुण्य
कर्माणि पुष्कलं वर्द्धते यशः॥ प्री
तिमान्पुंडरीकाक्षो गजंदुःखात्म
मुक्तवान्॥ ५०॥ वैशंपायन उवाच
॥ एतच्छुत्वा महाबाहो भारतानां

पितामहात् ॥ गजेंद्रमोक्षणंराजा
कुंतीपुत्रोयुधिष्ठिरः ॥ ५१ ॥ भ्रातृ
भिःसहितःसम्यक् ब्राम्हणैर्वेदपा
रगैः ॥ पूजयामासदेवेशंपार्श्वस्थं
मधुसूदनम् ॥ ५२ ॥ विस्मयोत्फुल्ल
नयनाःश्रुत्वानागस्यमोक्षणम् ॥
ऋषयस्तुमहाभागाःसर्वेप्रांजल

यस्तदा ॥ ५३ ॥ अजं वरेण्यं वरपद्म
नाभं महाबलं वेदनिधिं सुरोत्तमम् ॥
तं वेदगुह्यं पुरुषं पुराणं ववंदिरे वेद
विदां वरिष्ठम् ॥ ५४ ॥ एतत्पुण्यं महा
बाहो जनानां पुण्यकर्मणाम् ॥ दुःस्व
प्नदर्शने घोरे श्रुत्वा पापात्प्रमुच्यते
॥ ५५ ॥ तस्मात्त्वं हि महाराज प्रपद्य

शरणं हरिम् ॥ विमुक्तः सर्वपापेभ्यः
प्राप्स्यसे परमं पदम् ॥ ५६ ॥ यदा
महाग्राह गृहीतकातरं स्कपुष्पितेप
द्मवने महाद्विपम् ॥ विमोक्षयामास
गजं जनार्दनः स्मरामि दुःस्वप्नविना
शनं हरिम् ॥ ५७ ॥ परं पुराणं परमं
पवित्रं पुराणमीशं सुरलोकनाथम्

॥ सुरासुरैरर्चितपादपद्मं सनातनं
लोकगुरुं स्मरामि ॥ ५८ ॥ वरगज
शरणाद्विमुक्तिहेतुं पुरुषवरस्तुत
दिव्यदेहगीतम् ॥ सततमभिपठं
ति ये तु तेषां स्मरणमंतिककि-
ल्बिषापहं स्यात् ॥ ५९ ॥ धर्मद्रुव
द्रुमूलो वेदस्कंधः पुराणशाखाढ्यः

ऋतुकुस्कमोमोक्षफलोमधुसूदन
पादपोजयति॥६०॥नमोब्रह्म-
ण्यदेवाय गोब्राह्मणहिताय च॥
जगद्धिताय कृष्णाय गोविंदाय
नमोनमः॥६१॥आर्त्ताविषण्णाः
शिथिलाश्च भीता घोरेषु च व्या
धिषु वर्तमानाः॥संकीर्त्यनाराय

णाशब्दमात्रं विमुक्तदुःखाःसुखि
नोभवंति॥६२॥वेदेरामायणेचैव
पुराणेभारतेतथा॥आदौमध्ये
तथाचांतेहरिःसर्वत्रगीयते॥६३
॥एकोऽपिकृष्णस्यकृतःप्रणा
मोदशाश्वमेधावभृथेनतुल्यः॥
दशाश्वमेधीपुनरेतिजन्मकृष्ण

प्रणामी न पुनर्भवाय ॥ ६४ ॥
सर्वरत्नमयो मेरुः सर्वाश्चर्यम
यं नभः ॥ सर्वतीर्थमयी गंगा सर्व
देवमयो हरिः ॥ ६५ ॥ आकाशा
त् पतितं तोयं यथा गच्छति सा-
गरम् ॥ सर्वदेवनमस्कारः केश
वं प्रतिगच्छति ॥ ६६ ॥ गीतास